# श्री दत्तात्रय स्तोत्र संग्रह

*****************

## भृगु ऋषी विरचित - श्रीदत्तात्रेयस्तोत्रम्

बालाकप्रभा इंद्रनील जठीलं । भस्मांगरा गोत्वलं ।

शान्तंनाद विलीद चित्तपवनं । शार्दूल चन्मांबरं ।

ब्रह्मद्येसनकादी विस्वरी व्रीदं । सिद्धैसमाराधितं ।

आत्रेयं समूपास्मघेघ्रुदीमूदा । घेयं सदा योगीभीः ।

दिगंबरं भस्मविलेपितांगं । चक्रं त्रिशूलं डमरूं गदांच ।

पद्मासनस्तं शशीसूज्ञनेत्रं । दत्तात्रेयं घेय वभीष्ट सिद्धो ।

ॐ नमोश्री गुरूंदत्तं । दत्त देवं जगदगुरुं । निष्कलं निर्गुणं वंदे । दत्तात्रेयं नमाम्यहं ।

ब्रह्मालोकेशभूतेश । शंख चक्र गदाधरं ।
पाणीपात्रधरंदेवं । दत्तात्रेयं नमाम्यहं ।

सुरेश वंदितं देवं । त्रैलोक्य लोकवंदितं ।
हरिहरात्मकंदेवं । दत्तात्रेयं नमाम्यहं ।

निर्मलं नील वर्णंच । सुंदरं शामशोभितं । सुलोचनं विशालाक्षं । दत्तात्रेयं नमाम्यहं ।

त्रिशूलं डमरूंमाला । जटामुकुटमंडितं । मंडितं कुंडलं कर्णे । दत्तात्रेयं नमाम्यहं ।

विभूतींभूषितंदेहं । हार केयूर शोभितं ।
अनन्तप्रणवाकारं । श्री दत्तात्रेयं नमाम्यहं ।

प्रसन्नवदनं देवं । भुक्ति भुक्ती प्रदायकं ।
जनार्धनम् जगत्राणं । दत्तात्रेयं नमाम्यहं ।

राजराजं निदाचारं । कार्तवीर्यवरप्रदं ।
सुभद्रंभद्रकल्याणम् । दत्तात्रेयं नमाम्यहं ।

अनसूया प्रियकरं । अत्रिपुत्रं सुरेश्वरं । विख्यात योगीनांमोक्षं । दत्तात्रेयं नमाम्यहं ।

दिगंबर तनूंश्रेष्ठं । ब्रह्मसज्ज्यप्रदेस्थितं । हंसंखं

सात्मकं नित्यं । दत्तात्रेयं नमाम्यहं ।

कदायोगी कदाभोगी । बाललीला विनोदग्रह ।
दशनैरत्नसंकाशैही । दत्तात्रेयं नमाम्यहं ।

भूतवाता भवत्रासह । ग्रहपीडातथैवच ।
दरिद्र्यभ्यसन्द्वंभी । दत्तात्रेयं नमाम्यहं ।

चतुर्दश्यां बुधेवारे । जन्ममार्गशीरेशुभे । सारकं
विपुलं वंदे । दत्तात्रेयं नमाम्यहं ।

रक्तोत्पल दलंपादं । सर्वतीर्थं समुद्भवं । वंदितं
योगी विद्द्त्बैही । दत्तात्रेयं नमाम्यहं ।

ज्ञानदादा प्रभूसाक्षादी । गतिर्मोक्ष प्रदायिने ।
आत्मभूरीश्वर कृष्णक । दत्तात्रेयं नमाम्यहं ।

भृगूविनचितमिदं । दत्तात्रेयपारायणां विदं ।
साक्षात् यद्व्च्चयं ब्रह्मा । दत्तात्रेयं नमाम्यहं ।

प्राणीनांसद्बजन्तुनां । कर्मपाश प्रभंजनं । दत्तात्रेय
स्तुतीस्तोत्रं । सर्वांकामानवापुण्यात ।

अबुध्रोलघदे पुत्रं । धनधान्य समन्वितः ।
राजमाज्योभवेत् लक्ष्मीः । अप्राप्यं प्राप्नुजातनरह

।

त्रिसंद्यंजपमानस्तु । दत्तात्रेय स्तुतीं सदा ।
तस्यरोग भयंनास्ती । दिर्घायुर्विजयीभवेते ।

कुष्मांड डाकिनी भक्षक । पिशाच ब्रह्मराक्षसः ।
स्तोत्रस्य श्रुदमात्रेण । गच्छंजत्रणसंशयः ।

एतद् द्विशती श्लोकानां । आवृत्तीं पुरु विंशंतीं ।
तस्यावृत्ती सहस्त्रेण । दर्शनंनात्र संशयः ।

************************

दकारादि श्री दत्त सहस्रनाम स्तोत्रम्

॥अथ ध्यानम॥

यावद्द्वैतभ्रमस्तावन्न शान्तिर्न परं सुखम् ॥
अतस्तदर्थं वक्ष्येऽदः सर्वात्मत्वावबोधकम् ॥

॥ अथ श्री दकारादि श्री दत्त सहस्रनामस्तोत्रम् ॥

ॐ दत्तात्रेयो दयापूर्णो दत्तो दत्तकधर्मकृत् ।
दत्ताभयो दत्तधैर्यो दत्तारामो दरार्दनः ॥१॥

दवो दवघ्नो दकदो दकपो दकदाधिपः । दकवासी
दकधरो दकशायी दकप्रियः ॥२॥

दत्तात्मा दत्तसर्वस्वो दत्तभद्रो दयाघनः । दर्पको
दर्पकरुचिर्दर्पकातिशयाकृतिः ॥३॥

दर्पकी दर्पककलाभिज्ञो दर्पकपूजितः । दर्पकोनो
दर्पकोक्षवेगहृद्दर्पकार्दनः ॥४॥

दर्पकाक्षीड् दर्पकाक्षीपूजितो दर्पकाधिभूः ।
दर्पकोपरमो दर्पमाली दर्पकदर्पकः ॥५॥

दर्पहा दर्पदो दर्पत्यागी दर्पातिगो दमी ।
दर्भधृग्दर्भकृद्दर्भी दर्भस्थो दर्भपीठगः ॥६॥

दनुप्रियो दनुस्तुत्यो दनुजात्मजमोहहृत् ।
दनुजघ्नो दनुजजिद्दनुजश्रीविभञ्जनः ॥७॥

दमो दमीड् दमकरो दमिवन्द्यो दमिप्रियः ।
दमादियोगविद्दम्यो दम्यलीलो दमात्मकः ॥८॥

दमार्थी दमसंपन्नलभ्यो दमनपूजितः । दमदो
दमसंभाव्यो दममूलो दमीष्टदः ॥९॥

दमितो दमिताक्षश्च दमितेन्द्रियवल्लभः । दमूना
दमुनाभश्च दमदेवो दमालयः ॥१०॥

दयाकरो दयामूलो दयावश्यो दयाव्रतः । दयावान्
दयनीयेशो दयितो दयितप्रियः ॥११॥

दयनीयानसूयाभूर्दयनीयात्रिनंदनः ।
दयनीयप्रियकरो दयात्मा च दयानिधिः ॥१२॥

दयार्द्रो दयिताश्वत्थो दयाश्लिष्टो दयाघनः ।
दयाविष्यो दयाभीष्टो दयाप्तो दयनीयदृक् ॥१३॥

दयावृतो दयापूर्णो दयायुक्तान्तरस्थितः ।
दयालुर्दयनीयेक्षो दयासिन्धुर्दयोदयः ॥१४॥

दरद्रावितवातश्च दरद्रावितभास्करः ।
दरद्रावितवह्निश्च दरद्रावितवासवः ॥१५॥

दरद्रावितमृत्युश्च दरद्रावितचंद्रमाः ।
दरद्रावितभूतौघो दरद्रावितदैवतः ॥१६॥

दरास्त्रधृग्दरदरो दराक्षो दरहेतुकः । दरदूरो

दरातीतो दरमूलो दरप्रियः ॥१७॥

दरवाद्यो दरदवो दरधृग्दरवल्लभः ।
दक्षिणावर्तदरपो दरोदस्नानतत्परः ॥१८॥

दरप्रियो दस्रवन्द्यो दस्रेष्टो दस्रदैवतः । दरकण्ठो
दराभश्च दरहन्ता दरानुगः ॥१९॥

दररावद्राविताररिर्दररावार्दितासुरः । दररावमहामंत्रो
दरारार्पितभीर्दरीट् ॥२०॥

दरधृग्दरवासी च दरशायी दरासनः ।
दरकृद्दरहृच्चापि दरगर्भो दरातिगः ॥२१॥

दरिद्रपो दरिद्री च दरिद्रजनशेवधिः । दरीचरो
दरीसंस्थो दरीक्रीडो दरीप्रियः ॥२२॥

दरीलभ्यो दरीदेवो दरीकेतनहृत्स्थितिः ।
दरार्तिहृद्दलनकृद्दलप्रीतिर्दलोदरः ॥२३॥

दलादर्नष्यनुग्राही दलादनसुपूजितः ।
दलादगीतमहिमा दलादलहरीप्रियः ॥२४॥

दलाशनो दलचतुष्टयचक्रगतो दली ।
द्वित्र्यस्रपद्मगतिविद्दशास्राब्जविभेदकः ॥२५॥

द्विषड्दलाब्जभेत्ता च द्व्यष्टास्राब्जविभेदकः ।
द्विदलस्थो दशशतपत्रपद्मगतिप्रदः ॥२६॥

द्व्यक्षरावृत्तिकृद्-द्व्यक्षो दशास्यवरदर्पहा ।
दवप्रियो दवचरो दवशायी दवालयः ॥२७॥

दवीयान्दवक्त्रश्च दविष्ठायनपारकृत् । दवमाली
दवदवो दवदोषनिशातनः ॥२८॥

दवसाक्षी दवत्राणो दवारामो दवस्थगः ।
दशहेतुर्दशातीतो दशाधारो दशाकृतिः ॥२९॥

दशषड्बंधसंविद्धो दशषड्बंधभेदनः । दशाप्रदो
दशाभिज्ञो दशासाक्षी दशाहरः ॥३०॥

दशायुधो दशमहाविद्याच्र्यो दशपञ्चदृक् ।
दशलक्षणलक्ष्यात्मा दशषड्वाक्यलक्षितः ॥३१॥

दर्दुरव्रातविहितध्वनिज्ञापितवृष्टिकः । दशपालो
दशबलो दशेन्द्रिय विहारकृत् ॥३२॥

दशेन्द्रिय गणाध्यक्षो दशेन्द्रियदृगूर्ध्वगः ।
दशैकगुणगम्यश्च दशेन्द्रियमलापहा ॥३३॥

दशेन्द्रियप्रेरकश्च दशेन्द्रियनिबोधनः ।

दशैकमानमेयश्च दशैकगुणचालकः ॥३४॥

दशभूर्दर्शनाभिज्ञो दर्शनादर्शितात्मकः ।
दशाश्वमेधतीर्थेष्टो दशास्यरथचालकः ॥३५॥

दशास्यगर्वहर्ता च दशास्यपुरभञ्जनः ।
दशास्यकुलविध्वंसी दशास्यानुजपूजितः ॥३६॥

दर्शनप्रीतिदो दर्शयजनो दर्शनादुरः । दर्शनीयो
दशबलपक्षभिच्च दशार्तिहा ॥३७॥

दशार्तिगो दशाशापो दशग्रन्थविशारदः ।
दशप्राणविहारी च दशप्राणगतिर्दृशिः ॥३८॥

दशाङ्गुलाधिकात्मा च दाशार्हो दशषट्सुभुक् ।
दशप्रागाद्यङ्गुलीककरनम्रद्विडन्तकः ॥३९॥

दशब्राह्मणभेदज्ञो दशब्राह्मणभेदकृत् ।
दशब्राह्मणसंपूज्यो दशनार्तिनिवारणः ॥४०॥

दोषज्ञो दोषदो दोषाधिपबंधुर्द्विषद्धरः ।
दोषैकदृक्पक्षघाती दष्टसर्पार्तिशामकः ॥४१॥

दधिक्राश्च दधिक्रावगामी दध्यङ्मुनीष्टदः ।
दधिप्रियो दधिस्नातो दधिपो दधिसिन्धुगः ॥४२॥

दधिभो दधिलिप्ताङ्गो दध्यक्षतविभूषणः ।
दधिद्रप्सप्रियो दभ्रवेद्यविज्ञातविग्रहः ॥४३॥

दहनो दहनाधारो दहरो दहरालयः ।
दहृदृग्दहराकाशो दहराच्छादनान्तकः ॥४४॥

दग्धभ्रमो दग्धकामो दग्धार्तिर्दग्धमत्सरः ।
दग्धभेदो दग्धमदो दग्धाधिर्दग्धवासनः ॥४५॥

दग्धारिष्टो दग्धकष्टो दग्धार्तिर्दग्धदुष्क्रियः ।
दग्धासुरपुरो दग्धभुवनो दग्धसत्क्रियः ॥४६॥

दक्षो दक्षाध्वरध्वंसी दक्षपो दक्षपूजितः ।
दाक्षिणात्यार्चितपदो दाक्षिणात्यसुभावगः ॥४७॥

दक्षिणाशो दक्षिणेशो दक्षिणासादिताध्वरः ।
दक्षिणार्पितसल्लोको दक्षवामादिवर्जितः ॥४८॥

दक्षिणोत्तरमार्गज्ञो दक्षिण्यो दक्षिणार्हकः ।
द्रुमाश्रयो द्रुमावासो द्रुमशायी द्रुमप्रियः ॥४९॥

द्रुमजन्मप्रदो द्रुस्थो द्रुरूपभवशातनः ।
द्रुमत्वगम्बरो द्रोणो द्रोणीस्थो द्रोणपूजितः ॥५०॥

द्रुघणी द्रुघ्यणास्त्रश्च द्रुशिष्यो द्रुधर्मधृक् । द्रविणार्थो

द्रविणदो द्रावणो द्राविडप्रियः ॥५१॥

द्रावितप्रणताघो द्राक्फलो द्राक्केन्द्रमार्गवित् । द्राघीय आयुर्दधानो द्राघीयान्द्राक्प्रसादकृत् ॥५२॥

द्रुततोषो द्रुतगतिव्यतीतो द्रुतभोजनः । द्रुफलाशी द्रुदलभुग्दृषद्व्रत्याप्लवादरः ॥५३॥

द्रुपदेड्यो द्रुतमतिर्द्रुतीकरणकोविदः । द्रुतप्रमोदो द्रुतिधृग्द्रुतिक्रीडाविचक्षणः ॥५४॥

दृढो दृढाकृतिर्दार्ढ्यो दृढसत्त्वो दृढव्रतः । दृढच्युतो दृढबलो दृढार्थासक्तिवारणः ॥५५॥

दृढधीर्दृढभक्तिदृग्दृढभक्तिवरप्रदः । दृढदृग्दृढभक्तिज्ञो दृढभक्तो दृढाश्रयः ॥५६॥

दृढदण्डो दृढयमो दृढप्रदो दृढाङ्गकृत् । दृढकायो दृढध्यानो दृढाभ्यासो दृढासनः ॥५७॥

दृग्दो दृग्दोषहरणो दृष्टि द्वंद्व विराजितः । दृक्पूर्वो दृ~ग्मनोतीतो दृक्पूतगमनो दृगीट् ॥५८॥

दृगिष्टो दृष्ट्यविषमो दृष्टिहेतुर्दृष्टत्तनुः । दृग्लभ्यो

दृक्त्रययुतो दृग्बाहुल्यविराजितः ॥५९॥

द्युपतिर्द्युपदृग्द्युस्थो द्युमणिर्द्युप्रवर्तकः । द्युदेहो
द्युगमो द्युस्थो द्युभूर्द्युर्द्युलयो द्युमान् ॥६०॥

द्युनिड्गतिद्युतिद्यूनस्थानदोषहरो द्युभुक् ।
द्यूतकृद्द्यूतहृद्द्यूतदोषहृद्द्यूतदूरगः ॥६१॥

दृप्तो दृप्तार्दनो द्योस्थो द्योपालो द्योनिवासकृत् ।
द्रावितारिर्द्रावितालपमृत्युर्द्रावितकैतवः ॥६२॥

द्यावाभूमिसंधिदर्शी द्यावाभूमिधरो द्युदृक् ।
द्योकृद्द्योतहृद्द्योती द्योताक्षो द्योतदीपनः ॥६३॥

द्योतमूलो द्योतितात्मा द्योतोद्यौर्द्योतिताखिलः ।
द्वयवादिमतद्वेषी द्वयवादिमतान्तकः ॥६४॥

द्वयवादिविजयी दीक्षाद्वयवादिनिकृन्तनः ।
द्व्यष्टवर्षवया द्व्यष्टनृपवंद्यो द्विषट्क्रियः ॥६५॥

द्विषत्कलानिधिर्द्वीपिचर्मधृग्द्व्यष्टजातिकृत् ।
द्व्यष्टोपचारदयितो द्व्यष्टस्वरतनुर्द्विभित् ॥६६॥

द्व्यक्षराख्यो द्व्यष्टकोटिस्वजपीष्टार्थपूरकः ।
द्विपाद्द्व्यात्मा द्विगुर्द्वीशो द्व्यतीतो द्विप्रकाशकः

॥६७॥

द्वैतीभूतात्मको द्वैधीभूतचिद्द्वैधशामकः ।
द्विसप्तभुवनाधारो द्विसप्तभुवनेश्वरः ॥६८॥

द्विसप्तभुवनान्तस्थो द्विसप्तभुवनात्मकः ।
द्विसप्तलोककर्ता द्विसप्तलोकाधिपो द्विपः
॥६९॥

द्विसप्तविद्याभिज्ञो द्विसप्तविद्याप्रकाशकः ।
द्विसप्तविद्याविभवो द्विसप्तेन्द्रपदप्रदः ॥७०॥

द्विसप्तमनुमान्यश्च द्विसप्तमनुपूजितः ।
द्विसप्तमनुदेवो द्विसप्तमन्वन्तरर्धिकृत् ॥७१॥

द्विचत्वारिंशदुद्धर्ता द्विचत्वारिकलास्तुतः ।
द्विस्तनीगोरसास्पृग्द्विहायनीपालको द्विभुक्
॥७२॥

द्विसृष्टिर्द्विविधो द्वीड्यो द्विपथो द्विजधर्मकृत् ।
द्विजो द्विजातिमान्यश्च द्विजदेवो द्विजातिकृत्
॥७३॥

द्विजप्रेष्ठो द्विजश्रेष्ठो द्विजराजसुभूषणः ।

द्विजराजाग्रजो द्विड्द्वीड् द्विजाननसुभोजनः ॥७४॥

द्विजास्यो द्विजभक्तो द्विजातिभृद्द्विजसत्कृतः ।
द्विविधो द्व्यावृतिर्द्वंद्ववारणो द्विमुखादनः ॥७५॥

द्विजपालो द्विजगुरुर्द्विजराजासनो द्विपात् ।
द्विजिह्वसूत्रो द्विजिह्वफणछत्रो द्विजिह्वभत् ॥७६॥

द्वादशात्मा द्वापरदृग् द्वादशादित्यरूपकः ।
द्वादशीशो द्वादशारचक्रधृग् द्वादशाक्षरः ॥७७॥

द्वादशीपारणो द्वार्दश्यच्यो द्वादश षड्बलः ।
द्वासप्तति सहस्राङ्ग नाडीगति विचक्षणः ॥७८॥

द्वंद्वदो द्वंद्वदो द्वंद्वबीभत्सो द्वंद्वतापनः । द्वंद्वार्तिहृद्
द्वंद्वसहो द्वया द्वंद्वातिगो द्विगः ॥७९॥

द्वारदो द्वारविद्द्वास्थो द्वारधृग् द्वारिकाप्रियः ।
द्वारकृद् द्वारगो द्वारनिर्गम क्रम मुक्तिगः ॥८०॥

द्वारभृद् द्वारनवकगतिसंसृतिदर्शकः । द्वैमातुरो
द्वैतहीनो द्वैतारण्यविनोदनः ॥८१॥

द्वैतास्पृग् द्वैतगो द्वैताद्वैतमार्गविशारदः । दाता दातृप्रियो दावो दारुणो दारदाशनः ॥८२॥

दानदो दारुवसतिर्दास्यज्ञो दाससेवितः । दानप्रियो दानतोषो दानज्ञो दानविग्रहः ॥८३॥

दास्यप्रियो दासपालो दास्यदो दासतोषणः । दावोष्णहृद् दान्तसेव्यो दान्तज्ञो दान्त वल्लभः ॥८४॥

दातदोषो दातकेशो दावचारी च दावपः । दायकृद्दायभुग् दारस्वीकारविधिदर्शकः ॥८५॥

दारमान्यो दारहीनो दारमेधिसुपूजितः । दानवान् दानवारातिर्दानवाभिजनान्तकः ॥८६॥

दामोदरो दामकरो दारस्नेहोतचेतनः । दार्वीलेपो दारमोहो दारिकाकौतुकान्वितः ॥८७॥

दारिकादोद्धारकश्च दातदारुकसारथिः । दाहकृद्दाहशान्तिज्ञो दाक्षायण्यधिदैवतः ॥८८॥

द्रांबीजो द्रांमनुर्दान्तशान्तोपरतवीक्षितः । दिव्यकृद्दिव्यविद्दिव्यो दिविस्पृग् दिविजार्थदः

॥८९॥

दिक्पो दिक्पतिपो दिग्विद्दिगन्तरलुठद्यशः ।
दिग्दर्शनकरो दिष्टो दिष्टात्मा दिष्टभावनः ॥९०॥

दृष्टो दृष्टान्तदो दृष्टातिगो दृष्टान्तवर्जितः । दिष्टं
दिष्टपरिच्छेदहीनो दिष्टनियामकः ॥९१॥

दिष्टास्पृष्टगतिर्दिष्टेड्दिष्टकृद्दिष्टचालकः । दिष्टदाता
दिष्टहन्ता दुर्दिष्टफलशामकः ॥९२॥

दिष्टव्याप्तजगद्दिष्टशंसको दिष्टयत्नवान् ।
दितिप्रियो दितिस्तुत्यो दितिपूज्यो दितीष्टदः
॥९३॥

दितिपाखण्डदावो दिग्दिनचर्यापरायणः ।
दिगम्बरो दिव्यकांतिर्दिव्यगंधोऽपि दिव्यभुक्
॥९४॥

दिव्यभावो दीदिविकृद्दोषहृद्दीप्तलोचनः ।
दीर्घजीवी दीर्घदृष्टिर्दीर्घाङ्गो दीर्घबाहुकः ॥९५॥

दीर्घश्रवा दीर्घगतिर्दीर्घवक्षाश्च दीर्घपात् ।
दीनसेव्यो दीनबन्धुर्दीनपो दीपितान्तरः ॥९६॥

दीनोद्धर्ता दीप्तकान्तिर्दीप्रक्षुरसमायनः । दीव्यन्
दीक्षितसंपूज्यो दीक्षादो दीक्षितोत्तमः ॥९७॥

दीक्षणीयेष्टिकृद्दीक्षादीक्षाद्वयविचक्षणः । दीक्षाशी
दीक्षितान्नाशी दीक्षाकृद्दीक्षितादरः ॥९८॥

दीक्षिताथ्र्यो दीक्षिताशो दीक्षिताभीष्टपूरकः ।
दीक्षापटुर्दीक्षितात्मा दीद्यद्दीक्षितगर्वहृत् ॥९९॥

दुष्कर्महा दुष्कृतज्ञो दुष्कृद्दुष्कृतिपावनः ।
दुष्कृत्साक्षी दुष्कृतहृत् दुष्कृद्धा दुष्कृदार्तिदः
॥१००॥

दुष्क्रियान्तो दुष्करकृद् दुष्क्रियाघनिवारकः ।
दुष्कुलत्याजको दुष्कृत्पावनो दुष्कुलान्तकः
॥१०१॥

दुष्कुलाघहरो दुष्कृद्गतिदो दुष्करक्रियः ।
दुष्कलङ्कविनाशी दुष्कोपो दुष्कण्टकार्दनः
॥१०२॥

दुष्कारी दुष्करतपा दुःखदो दुःखहेतुकः ।
दुःखत्रयहरो दुःखत्रयदो दुःखदुःखदः ॥१०३॥

दुःखत्रयार्तिविद् दुःखिपूजितो दुःखशामकः ।
दुःखहीनो दुःखहीनभक्तो दुःखविशोधनः ॥१०४॥

दुःखकृद् दुःखदमनो दुःखितारिश्च दुःखनुत् ।
दुःखातिगो दुःखलहा दुःखेटार्तिनिवारणः ॥१०५॥

दुःखेटदृष्टिदोषघ्नो दुःखगारिष्टनाशकः ।
दुःखेचरदशार्तिघ्नो दुष्टखेटानुकूल्यकृत् ॥१०६॥

दुःखोदर्काच्Cआदको दुःखोदर्कगतिसूचकः ।
दुःखोदर्कार्थसन्त्यागी दुःखोदर्कार्थदोषदृक्
॥१०७॥

दुर्गा दुर्गार्तिहृद् दुर्गी दुर्गेशो दुर्गसंस्थितः । दुर्गमो
दुर्गमगतिर्दुर्गारामश्च दुर्गभूः ॥१०८॥

दुर्गानवकसंपूज्यो दुर्गानवकसंस्तुतः । दुर्गभिद्
दुर्गतिर्दुर्गमार्गगो दुर्गमार्थदः ॥१०९॥

दुर्गतिघ्नो दुर्गतिदो दुर्ग्रहो दुर्ग्रहार्तिहृत् ।
दुर्ग्रहावेशहृद् दुष्टग्रहनिग्रहकारकः ॥११०॥

दुर्ग्रहोच्चाटको दुष्टग्रहजिद् दुर्गमादरः ।
दुर्दृष्टिबाधाशमनो दुर्दृष्टिभयहापकः ॥१११॥

दुर्गुणो दुर्गुणातीतो दुर्गुणातीतवल्लभः ।
दुर्गन्धनाशो दुर्घातो दुर्घटो दुर्घटक्रियः ॥११२॥

दुश्चर्यो दुश्चरित्रारिर्दुश्चिकित्स्यगदान्तकः ।
दुश्चित्ताल्हादको दुश्चिच्छास्ता दुश्चेष्टशिक्षकः
॥११३॥

दुश्चिन्ताशमनो दुश्चिद्दुश्छन्दविनिवर्तकः । दुर्जयो
दुर्जरो दुर्जिज्जयी दुर्जेयचित्तजित् ॥११४॥

दुर्जाप्यहर्ता दुर्वार्ताशान्तिर्दुर्जातिदोषहृत् ।
दुर्जनारिर्दुश्चवनो दुर्जनप्रान्तहापकः ॥११५॥

दुर्जनार्तो दुर्जनार्तिहरो दुर्जलदोषहृत् । दुर्जीवहा
दुष्टहन्ता दुष्टार्तपरिपालकः ॥११६॥

दुष्टविद्रावणो दुष्टमार्गभिद् दुष्टसंगहृत् ।
दुर्जीवहत्यासंतोषो दुर्जनाननकीलनः ॥११७॥

दुर्जीववैरहृद् दुष्टोच्चाटको दुस्तरोद्धरः । दुष्टदण्डो
दुष्टखण्डो दुष्टध्रुग् दुष्टमुंडनः ॥११८॥

दुष्टभावोपशमनो दुष्टविद् दुष्टशोधनः । दुस्तर्कहृद्
दुस्तर्कारिर्दुस्तापपरिशान्तिकृत् ॥११९॥

दुर्दैवहृद् दुन्दुभिघ्नो दुन्दुभ्याघातहर्षकृत् ।
दुर्धीहरो दुर्नयहृद्दुःपक्षिध्वनिदोषहृत् ॥१२०॥

दुष्प्रयोगोपशमनो दुष्प्रतिग्रहदोषहृत् । दुर्बलाप्तो
दुर्बोधात्मा दुर्बन्धच्छिद्दुरत्ययः ॥१२१॥

दुर्बाधाहृद् दुर्भयहृद् दुर्भ्रमोपशमात्मकः ।
दुर्भिक्षहृद्दुर्यशोहृद् दुरुत्पातोपशामकः ॥१२२॥

दुर्मन्त्रयन्त्रतन्त्रच्छिद् दुर्मित्रपरितापनः । दुर्योगहृद्
दुराधर्षो दुराराध्यो दुरासदः ॥१२३॥

दुरत्ययस्वमायाब्धि तारको दुरवग्रहः । दुर्लभो
दुर्लभतमो दुरालापाघशामकः ॥१२४॥

दुर्नामहृद् दुराचारपावनो दुरपोहनः ।
दुराश्रमाघहृद्दुर्गपथलभ्यचिदात्मकः ॥१२५॥

दुरध्वपारदो दुर्भुक्पावनो दुरितार्तिहा ।
दुराश्लेषाघहर्ता दुर्मैथुनैनोनिबर्हणः ॥१२६॥

दुरामयान्तो दुर्वैरहर्ता दुर्व्यसनान्तकृत् । दुःसहो
दुःशकुनहृद् दुःशीलपरिवर्तनः ॥१२७॥

दुःशोकहृद् दुःश~ग्काहृद्दुःसङ्गभयवारणः ।

दुःसहाभो दुःसहदृग्दुःस्वप्नभयनाशनः ॥१२८॥

दुःसंगदोषस~ज्जातदुर्मनीषाविशोधनः ।
दुःसङ्गिपापदहनो दुःक्षणाघनिवर्तनः ॥१२९॥

दुःक्षेत्रपावनो दुःक्षुद् भयहृद्दुःक्षयार्तिहृत् ।
दुःक्षत्रहृच्च दुर्ज्ञेयो दुर्ज्ञानपरिशोधनः ॥१३०॥

दूतो दूतेरको दूतप्रियो दूरश्च दूरदृक् ।
दूनचित्ताल्हादकश्च दूर्वाभो दूष्यपावनः ॥१३१॥

देदीप्यमाननयनो देवो देदीप्यमानभः ।
देदीप्यमानरदनो देश्यो देदीप्यमानधीः ॥१३२॥

देवेष्टो देवगो देवी देवता देवतार्चितः ।
देवमातृप्रियो देवपालको देववर्धकः ॥१३३॥

देवमान्यो देववन्द्यो देवलोकप्रियंवदः ।
देवारिष्टहरो देवाभीष्टदो देवतात्मकः ॥१३४॥

देवभक्तप्रियो देवहोता देवकुलादृतः ।
देवतन्तुर्देवसंपद्देवद्रोहिसुशिक्षकः ॥१३५॥

देवात्मको देवमयो देवपूर्वश्च देवभूः । देवमार्गप्रदो
देवशिक्षको देवगर्वहृत् ॥१३६॥

देवमार्गान्तरायघ्नो देवयज्ञादिधर्मधृक् । देवपक्षी
देवसाक्षी देवदेवेशभास्करः ॥१३७॥

देवारातिहरो देवदूतो दैवतदैवतः । देवभीतिहरो
देवगेयो देवहविर्भुजः ॥१३८॥

देवश्राव्यो देवदृश्यो देवर्णी देवभोग्यभुक् । देवीशो
देव्यभीष्टार्थो देवीड्यो देव्यभीष्टकृत् ॥१३९॥

देवीप्रियो देवकीजो देशिको देशिकार्चितः ।
देशिकेड्यो देशिकात्मा देवमातृकदेशपः ॥१४०॥

देहकृद्देहधृग्देही देहगो देहभावनः । देहपो देहदो
देहचतुष्टयविहारकृत् ॥१४१॥

देहीतिप्रार्थनीयश्च देहबीजनिकृन्तनः ।
देवनास्पृग्देवनकृद्देहास्पृग्देहभावनः ॥१४२॥

देवदत्तो देवदेवो देहातीतोऽपि देहभृत् ।
देहदेवालयो देहासङ्गो देहरथेष्टगः ॥१४३॥

देहधर्मा देहकर्मा देहसंबन्धपालकः । देयात्मा
देयविद्देशापरिच्छिन्नश्च देशकृत् ॥१४४॥

देशपो देशवान् देशी देशज्ञो देशिकागमः ।

देशभाषापरिज्ञानी देशभूर्देशपावनः ॥१४५॥

देश्यपूज्यो देवकृतोपसर्गनिवर्तकः ।
दिविषद्विहितावर्षातिवृष्ट्यादीतिशामकः ॥१४६॥

दैवीगायत्रिकाजापी दैवसंपत्तिपालकः ।
दैवीसंपत्तिसंपन्नमुक्तिकृद्दैवभावगः ॥१४७॥

दैवसंपत्त्यसंपन्नछायास्पृग्दैत्यभावहृत् । दैवदो
दैवफलदो दैवादित्रिक्रियेश्वरः ॥१४८॥

दैवानुमोदनो दैन्यहरो दैवज्ञदेवतः । दैवज्ञो
दैववित्पूज्यो दैविको दैन्यकारणः ॥१४९॥

दैन्याञ्जनहृतस्तंभो दोषत्रयशमप्रदः । दोषहर्ता
दैवभिषग्दोषदो दोर्द्वयान्वितः ॥१५०॥

दोषज्ञो दोहदाशंसी दोग्धा दोष्यन्तितोषितः ।
दौरात्म्यदूरो दौरात्म्यहृद्दौरात्म्यार्तिशान्तिकृत्
॥१५१॥

दौरात्म्यदोषसंहर्ता दौरात्म्यपरिशोधनः ।
दौर्मनस्यहरो दौत्यकृद्दौत्योपास्तशक्तिकः ॥१५२॥

दौर्भाग्यदोऽपि दौर्भाग्यहृद्दौर्भाग्यार्तिशान्तिकृत् ।

दौष्ट्यत्रो दौष्कुल्यदोषहृद्दौष्कुल्याधिशामकः
॥१५३॥

दंदशूकपरिष्कारो दंदशूककृतायुधः ।
दन्तिचर्मपरिधानो दन्तुरो दन्तुरारिहृत् ॥१५४॥

दन्तुरघ्नो दण्डधारी दण्डनीतिप्रकाशकः ।
दांपत्यार्थप्रदो दंर्पत्यच्च्यो दंपत्यभीष्टदः ॥१५५॥

दंपतिद्वेषशमनो दंपतिप्रीतिवर्धनः ।
दन्तोलूखलको दंष्ट्री दन्त्यास्यो दन्तिपूर्वगः
॥१५६॥

दंभोलिभृद्दंभहर्ता दंड्यविद्दंशवारणः ।
दन्द्रम्यमाणशरणो दन्त्यश्वरथपत्तिदः ॥१५७॥

दन्द्रम्यमाणलोकार्तिकरो दण्ड त्रयाश्रितः ।
दण्डपाण्यर्चपद्दण्डि वासुदेवस्तुतोऽवतु ॥१५८॥

इति श्रीमद्दकारादि दत्तनाम सहस्रकं । पठतां
शृण्वतां वापि परानन्दपदप्रदम् ॥१५९॥

॥ इति श्री परम पूज्य परमहंस परिव्राजकाचार्य

श्री श्री श्री मद्वासुदेवानन्द सरस्वती यति वरेण्य

विरचित दकारादि दत्त सहस्रनामस्तोत्रम् ॥
****************************

दत्त अथर्वशीर्ष

॥ हरिः ॐ ॥

ॐ नमो भगवते दत्तात्रेयाय अवधूताय

दिगंबरायविधिहरिहराय आदितत्त्वाय आदिशक्तये ॥१॥

त्वं चराचरात्मकः सर्वव्यापी सर्वसाक्षी

त्वं दिक्कालातीतः त्वं द्वन्द्वातीतः ॥२॥

त्वं विश्वात्मकः त्वं विश्वाधारः विश्वेशः

विश्वनाथः त्वं विश्वनाटकसूत्रधारः

त्वमेव केवलं कर्तासि त्वं अकर्तासि च नित्यम् ॥३॥

त्वं आनन्दमयः ध्यानगम्यः त्वं आत्मानन्दः

त्वं परमानन्दः त्वं सच्चिदानन्दः

त्वमेव चैतन्यः चैतन्यदत्तात्रेयः

ॐ चैतन्यदत्तात्रेयाय नमः ॥४॥

त्वं भक्तवत्सलः भक्ततारकः भक्तरक्षकः

दयाघनः भजनप्रियः त्वं पतितपावनः

करुणाकरः भवभयहरः ॥५॥

त्वं भक्तकारणसंभूतः अत्रिसुतः अनसूयात्मजः

त्वं श्रीपादश्रीवल्लभः त्वं गाणगग्रामनिवासी

श्रीमन्नृसिंहसरस्वती त्वं श्रीनृसिंहभानः

अक्कलकोटनिवासी श्रीस्वामीसमर्थः

त्वं करवीरनिवासी परमसद्गुरु श्रीकृष्णसरस्वती

त्वं श्रीसद्गुरु माधवसरस्वती ॥६॥

त्वं स्मर्तृगामी श्रीगुरूदत्तः शरणागतोऽस्मि त्वाम् ।

दीने आर्ते मयि दयां कुरु

तव एकमात्रदृष्टिक्षेपः दुरितक्षयकारकः ।

हे भगवन। वरददत्तात्रेय।

मामुद्धर। मामुद्धर। मामुद्धर इति प्रार्थयामि ।

ॐ द्रां दत्तात्रेयाय नमः ॥७॥

॥ ॐ दिगंबराय विद्महे अवधूताय धीमहि तन्नो दत्तः प्रचोदयात् ॥

****************************

दत्त भावसुधारस स्तोत्रम्

दत्तात्रेयं परमसुखमयं वेदगेयं ह्यमेयं

योगिध्येयं हृतनिजभयं स्वीकृतानेककायम् ।

दुष्टागम्यं विततविजयं देवदैत्यर्षिवन्द्यं

वन्दे नित्यं विहितविनयं चाव्ययं भावगम्यम् ॥१॥

दत्तात्रेय नमोऽस्तु ते भगवते पापक्षयं कुर्वते

दारिद्र्यं हरते भयं शमयते कारुण्यमातन्वते ।

भक्तानुद्धरते शिवं च ददते सत्कीर्तिमातन्वते

भूतान्द्रावयते वरं प्रददते श्रेयः पते सद्गते ॥२॥

एकं सौभाग्यजनकं तारकं लोकनायकम् ।

विशोकं त्रातभजकं नमस्ये कामपूरकम् ॥३॥

नित्यं स्मरामि ते पादे हतखेदे सुखप्रदे ।

प्रदेहि मे शुद्धभावं भावं यो वारयेद्द्रुतम् ॥४॥

समस्तसंपत्प्रदमार्तबंधुं
समस्तकल्याणदमस्तबंधुम् ।

कारुण्यसिंधुं प्रणमामि दत्तं यः शोधयत्याशु
मलीनचित्तम् ॥५॥

समस्तभूतांतरबाह्यवर्ती यश्चात्रिपुत्रो यतिचक्रवर्ती
।

सुकीर्तिसंव्याप्तदिगंतरालः स पातु मां
निर्जितभक्तकालः ॥६॥

व्याध्याधिदारिद्र्यभयार्तिहर्ता
स्वगुप्तयेऽनेकशरीरधर्ता

स्वदासभर्ता बहुधा विहर्ता कर्ताप्यकर्ता

स्ववशोऽरिहर्ता ॥७॥

स चानसूयातनयोऽभवद्यो विष्णुः स्वयं भाविकरक्षणाय ।

गुणा यदीया म हि बुद्धिमद्भिर्गण्यंत आकल्पमपीह धात्रा ॥८॥

न यत्कटाक्षामृतवृष्टितोऽत्र

तिष्ठन्ति तापाः सकलाः परत्र ।

यः सद्गतिं संप्रददाति भूमा

स मेऽन्तरे तिष्ठतु दिव्यधामा ॥९॥

स त्वं प्रसीदात्रिसुतार्तिहारिन्

दिगम्बर स्वीयमनोविहारिन् ।

दुष्टा लिपिर्या लिखितात्र धात्रा

कार्या त्वया साऽतिशुभा विधात्रा ॥१०॥

सर्वमंगलसंयुक्त सर्वैश्वर्यसमन्वित ।

प्रसन्ने त्वयि सर्वेशे किं केषां दुर्लभं कुह ॥११॥

हार्दांधतिमिरं हन्तुं शुद्धज्ञानप्रकाशक ।
त्वदंघ्रिनखमाणिक्यद्युतिरेवालमीश नः ॥१२॥
स्वकृपार्द्रकटाक्षेण वीक्षसे चेत्सकृद्धि माम् ।
भविष्यामि कृतार्थोऽत्र पात्रं चापि स्थितेस्तव
॥१३॥
क्व च मन्दो वराकोऽहं क्व भवान्भगवान्प्रभुः ।
अथापि भवदावेश भाग्यवानस्मि ते दृशा ॥१४॥
विहितानि मया नाना पातकानि च यद्यपि ।
अथापि ते प्रसादेन पवित्रोऽहं न संशयः ॥१५॥
स्वलीलया त्वं हि जनान्पुनासि
तन्मे स्वलीला श्रवणं प्रयच्छ ।
तस्याः श्रुतेः सान्द्रविलोचनोऽहं
पुनामि चात्मानमतीव देव ॥१६॥
पुरतस्ते स्फुटं वच्मि दोषराशिरहं किल ।
दोषा ममामिताः पांसुवृष्टिबिन्दुसमा विभोः ॥१७॥

पापीयसामहं मुख्यस्त्वं तु कारुणिकाग्रणीः ।
दयनीयो न हि क्वापि मदन्य इति भाति मे ॥१८॥
ईदृशं मां विलोक्यापि कृपालो ते मनो यदि ।
न द्रवेत्तर्हि किं वाच्यमदृष्टं मे तवाग्रतः ॥१९॥
त्वमेव सृष्टवान्सर्वान्दत्तात्रेय दयानिधे ।
वयं दीनतराः पुत्रास्तवाकल्पाः स्वरक्षणे ॥२०॥
जयतु जयतु दत्तो देवसङ्घाभिपूज्यो
जयतु जयतु भद्रो भद्रदो भावुकेज्यः ।
जयतु जयतु नित्यो निर्मलज्ञानवेद्यो
जयतु जयतु सत्यः सत्यसंधोऽनवद्यः ॥२१॥
यद्यहं तव पुत्रः स्यां पिता माता त्वमेव मे ।
दयास्तन्यामृतेनाशु मातस्त्वमभिषिञ्च माम्
॥२२॥
ईशाभिन्ननिमित्तोपादनात्स्रष्टुरस्य ते ।
जगद्योने सुतो नाहं दत्त मां परिपाह्यतः ॥२३॥

तव वत्सस्य मे वाक्यं सूक्तं वाऽसूक्तमप्यहो ।
क्षन्तव्यं मेऽपराधश्च त्वत्तोऽन्या न गतिर्हि मे ॥२४॥

अनन्यगतिकस्यास्य बालस्य मम ते पितः ।
न सर्वथोचितोपेक्षा दोषाणां गणनापि च ॥२५॥

अज्ञानित्वादकल्पत्वाद्दोषा मम पदे पदे ।
भवन्ति किं करोमीश करुणावरुणालय ॥२६॥

अथापि मेऽपराधैश्चेदायास्यन्तर्विषादताम् ।
पदाहतार्भकेणापि माता रुष्यति किं भुवि ॥२७॥

रङ्कमङ्कगतं दीनं ताडयन्तं पदेन च ।
माता त्यजति किं बालं प्रत्युताश्वासयत्यहो ॥२८॥

तादृशं मामकल्पं चेन्नाश्वासयसि भो प्रभो ।
अहहा बत दीनस्य त्वां विना मम का गतिः ॥२९॥

शिशुर्नायं शठः स्वार्थीत्यपि नायातु तेऽन्तरम् ।
लोके हि क्षुधिता बालाः स्मरन्ति निजमातरम्

॥३०॥

जीवनं भिन्नयोः पित्रोर्लोक एकतराच्छिशोः ।
त्वं तूभयं दत्त मम माऽस्तु निर्दयता मयि ॥३१॥
स्तवनेन न शक्तोऽस्मि त्वां प्रसादयितुं प्रभो ।
ब्रह्माद्याश्चकितास्तत्र मन्दोऽहं शक्नुयां कथम्
॥३२॥

दत्त त्वद्बालवाक्यानि सूक्तासूक्तानि यानि च ।
तानि स्वीकुरु सर्वज्ञ दयालो भक्तभावन ॥३३॥
ये त्वा शरणमापन्नाः कृतार्था अभवन्हि ते ।
एतद्विचार्य मनसा दत्त त्वां शरणं गतः ॥३४॥
त्वन्निष्ठास्त्वत्परा भक्तास्तव ते सुखभागिनः ।
इति शास्त्रानुरोधेन दत्त त्वां शरणं गतः ॥३५॥
स्वभक्ताननुगृह्णाति भगवान् भक्तवत्सलः ।
इति सञ्चित्य सञ्चित्य कथञ्चिद्धारयाम्यसून्
॥३६॥

त्वद्भक्तस्त्वदधीनोऽहमस्मि तुभ्यं समर्पितम् ।
तनुं मनो धनं चापि कृपां कुरु ममोपरि ॥३७॥
त्वयि भक्तिं नैव जाने न जानेऽर्चनपद्धतिम् ।
कृतं न दानधर्मादि प्रसादं कुरु केवलम् ॥३८॥
ब्रह्मचर्यादि नाचीर्णं नाधीता विधितः श्रुतिः ।
गार्हस्थ्यं विधिना दत्त न कृतं तत्प्रसीद मे ॥३९॥
न साधुसङ्गमो मेऽस्ति न कृतं वृद्धसेवनम् ।
न शास्त्रशासनं दत्त केवलं त्वं दयां कुरु ॥४०॥
ज्ञातेऽपि धर्मे नहि मे प्रवृत्ति
र्ज्ञातेऽप्यधर्मे न ततो निवृत्तिः ॥
श्रीदत्तनाथेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥४१॥
कृतिः सेवा गतिर्यात्रा स्मृतिश्चिन्ता स्तुतिर्वचः ।
भवन्तु दत्त मे नित्यं त्वदीया एव सर्वथा ॥४२॥
प्रतिज्ञा ते न भक्ता मे नश्यन्तीति सुनिश्चितम् ।

श्रीदत्त चित्त आनीय जीवनं धारयाम्यहम् ॥४३॥
दत्तोऽहं ते मयेतीश आत्मदानेन योऽभवत् ।
अनसूयात्रिपुत्रः स श्रीदत्तः शरणं मम ॥४४॥
कार्तवीर्यार्जुनायादाद्योगर्धिमुभयीं प्रभुः ।
अव्याहतगतिं चासौ श्रीदत्तः शरणं मम ॥४५॥
आन्वीक्षिकीमलर्काय विकल्पत्यागपूर्वकम् ।
योऽदादाचार्यवर्यः स श्रीदत्तः शरणं मम ॥४६॥
चतुर्विंशतिगुर्वाप्तं हेयोपादेयलक्षणं ।
ज्ञानं यो यदवेऽदात्स श्रीदत्तः शरणं मम ॥४७॥
मदालसागर्भरत्नालर्काय प्राहिणोच्च यः ।
योगपूर्वात्मविज्ञानं श्रीदत्तः शरणं मम ॥४८॥
आयुराजाय सत्पुत्रं सेवाधर्मपराय यः ।
प्रददौ सद्गतिं चैष श्रीदत्तः शरणं मम ॥४९॥
लोकोपकृतये विष्णुदत्तविप्राय योऽर्पयत् ।
विद्यास्तच्छ्राद्धभुग्यः स श्रीदत्तः शरणं मम ॥५०॥

भर्त्रा सहानुगमनविधिं यः प्राह सर्ववित् ।
राममात्रे रेणुकायै श्रीदत्तः शरणं मम ॥५१॥
समूलमाह्निकं कर्म सोमकीर्तिनृपाय यः ।
मोक्षोपयोगि सकलं श्रीदत्तः शरणं मम ॥५२॥
नामधारक भक्ताय निर्विण्णाय व्यदर्शयत् ।
तुष्टः स्तुत्या स्वरूपं स श्रीदत्तः शरणं मम ॥५३॥
यः कलिब्रह्मसंवादमिषेणाह युगस्थितीः ।
गुरुसेवां च सिद्धाऽऽस्याच्छ्रीदत्तः शरणं मम
॥५४॥
दुर्वासःशापमाश्रुत्य योऽम्बरीषार्थमव्ययः ।
नानावतारधारी स श्रीदत्तः शरणं मम ॥५५॥
अनसूयासतीदुग्धास्वादायेव त्रिरूपतः ।
अवातरदजो योऽपि श्रीदत्तः शरणं मम ॥५६॥
पीठापुरे यः सुमतिब्राह्मणीभक्तितोऽभवत् ।
श्रीपादस्तत्सुतस्त्राता श्रीदत्तः शरणं मम ॥५७॥

प्रकाशयामास सिद्धमुखात्स्थापनमादितः ।
महाबलेश्वरस्यैष श्रीदत्तः शरणं मम ॥५८॥
चण्डाल्यपि यतो मुक्ता गोकर्णे तत्र योऽवसत् ।
लिङ्गतीर्थमये त्र्यब्दं श्रीदत्तः शरणं मम ॥५९॥
कृष्णाद्वीपे कुरुपुरे कुपुत्रं जननीयुतम् ।
यो हि मृत्योरपाच्छ्रीपाच्छ्रीदत्तः शरणं मम ॥६०॥
रजकायापि दास्यन्यो राज्यं कुरुपुरे प्रभुः ।
तिरोऽभूदज्ञदृष्ट्या स श्रीदत्तः शरणं मम ॥६१॥
विश्वासघातिनश्चोरान्स्वभक्तघ्नान्निहत्य यः ।
जीवयामास भक्तं स श्रीदत्तः शरणं मम ॥६२॥
करञ्जनगरेऽम्बायाः प्रदोषव्रतसिद्धये ।
योऽभूत्सुतो नृहर्याख्यः श्रीदत्तः शरणं मम ॥६३॥
मूको भूत्वा व्रतात्पश्चाद्वदन्वेदान्स्वमातरम् ।
प्रव्रजन् बोधयामास श्रीदत्तः शरणं मम ॥६४॥
काशीवासी स संन्यासी निराशीष्ट्वप्रदो वृषम् ।

वैदिकं विशदीकुर्वन् श्रीदत्तः शरणं मम ॥६५॥
भूमिं प्रदक्षिणीकृत्य सशिष्यो वीक्ष्य मातरम् ।
जहार द्विजशूलार्तिं श्रीदत्तः शरणं मम ॥६६॥
शिष्यत्वेनोररीकृत्य सायंदेवं ररक्ष यः ॥
भीते च क्रूरयवनाच्छ्रीदत्तः शरणं मम ॥६७॥
प्रेरयत्तीर्थयात्रायै तीर्थरूपोऽपि यः स्वकान् ।
सम्यग्धर्ममुपादिश्य श्रीदत्तः शरणं मम ॥६८॥
सशिष्यः पर्यलीक्षेत्रे वैद्यनाथसमीपतः ।
स्थित्वोद्दधार मूढो यः श्रीदत्तः शरणं मम ॥६९॥
विद्वत्सुतमविद्यं यो आगतं लोकनिन्दितम् ।
छिन्नजिह्वं बुधं चक्रे श्रीदत्तः शरणं मम ॥७०॥
नृसिंहवाटिकास्थो यः प्रददौ शाकभुङ्निधिम् ।
दरिद्रब्राह्मणायासौ श्रीदत्तः शरणं मम ॥७१॥
भक्ताय त्रिस्थलीयात्रां दर्शयामास यः क्षणात् ।
चकार वरदं क्षेत्रं स श्रीदत्तः शरणं मम ॥७२॥

प्रेतार्तिं वारयित्वा यो ब्राह्मण्यै भक्तिभावितः ।
ददौ पुत्रौ स गतिदः श्रीदत्तः शरणं मम ॥७३॥
तत्त्वं यो मृतपुत्रायै बोधयित्वाप्यजीवयत् ।
मृतं कल्पद्रुमस्थः स श्रीदत्तः शरणं मम ॥७४॥
दोहयामास भिक्षार्थं यो वन्ध्यां महिषीं प्रभुः ।
दारिद्र्यदावदावः स श्रीदत्तः शरणं मम ॥७५॥
राजप्रार्थित एत्यास्थान्मठे यो गाणगापुरे ।
ब्रह्मरक्षः समुद्धर्ता श्रीदत्तः शरणं मम ॥७६॥
विश्वरूपं निन्दकाय शिबिकास्थः स्वलङ्कृतः ।
गर्वहा दर्शयद्यः स श्रीदत्तः शरणं मम ॥७७॥
त्रिविक्रमेण चानीतौ गर्वितौ ब्राह्मणद्विषौ ।
बोधयामास तौ यः स श्रीदत्तः शरणं मम ॥७८॥
उक्त्वा चतुर्वेदशाखातदङ्गादिकमीश्वरः ।
विप्रगर्वहरो यः स श्रीदत्तः शरणं मम ॥७९॥
सप्तजन्मविदं सप्तरेखोल्लङ्घनतो ददौ ।

यो हीनाय श्रुतिस्फूर्तिः श्रीदत्तः शरणं मम ॥८०॥
त्रिविक्रमायाह कर्मगतिं दत्तविदा पुनः ।
वियुक्तं पतितं चक्रे श्रीदत्तः शरणं मम ॥८१॥
रक्षसे वामदेवेन भस्ममाहात्म्यमुद्गतिम् ।
उक्तां त्रिविक्रमायाह श्रीदत्तः शरणं मम ॥८२॥
गोपीनाथसुतो रुग्णो मृतस्तत्स्त्री शुशोच ताम् ।
बोधयामास यो योगी श्रीदत्तः शरणं मम ॥८३॥
गुर्वगस्त्यर्षिसंवादरूपं स्त्रीधर्ममाह यः ।
रूपान्तरेण स प्राज्ञः श्रीदत्तः शरणं मम ॥८४॥
विधवाधर्ममादिश्यानुगमं चाक्षभस्मदः ।
अजीवयन्मृतं विप्रं श्रीदत्तः शरणं मम ॥८५॥
वेश्यासत्यै तु रुद्राक्षमाहात्म्ययुतमीट्कृतम् ।
प्रसादं प्राह यः सत्यै श्रीदत्तः शरणं मम ॥८६॥
शतरुद्रीयमाहात्म्यं मृतराट् सुतजीवनम् ।
सत्यै शशंस स गुरुः श्रीदत्तः शरणं मम ॥८७॥

कचाख्यानं स्त्रियो मंत्रानर्हतार्थसुभाग्यदम् ।
सोमव्रतं च यः प्राह श्रीदत्तः शरणं मम ॥८८॥
ब्राह्मण्या दुःस्वभावं यो निवार्याह्निकमुत्तमम् ।
शशंस ब्राह्मणायासौ श्रीदत्तः शरणं मम ॥८९॥
गार्हस्थधर्मं विप्राय प्रत्यवायजिहासया ।
क्रममुक्त्यै य ऊचे स श्रीदत्तः शरणं मम ॥९०॥
त्रिपुंपर्याप्तपाकेन भोजयामास यो नृणाम् ।
सिद्धश्चतुःसहस्राणि श्रीदत्तः शरणं मम ॥९१॥
अश्वत्थसेवामादिश्य पुत्रौ योऽदात्फलप्रदः ।
चित्रकृद्वृद्धवन्ध्यायै श्रीदत्तः शरणं मम ॥९२॥
कारयित्वा शुष्ककाष्ठसेवां तद्वृक्षतां नयन् ।
विप्रकुष्ठं जहारासौ श्रीदत्तः शरणं मम ॥९३॥
भजन्तं कष्टतोऽप्याह सायंदेवं परीक्ष्य यः ।
गुरुसेवाविधानं स श्रीदत्तः शरणं मम ॥९४॥
शिवतोषकरीं काशीयात्रां भक्ताय योऽवदत् ।

सविधिं विहितां त्वष्ट्रा श्रीदत्तः शरणं मम ॥९५॥

कौण्डिण्यधर्मविहितमनंतव्रतमाह यः ।

कारयामास तद्यो‌ऽपि श्रीदत्तः शरणं मम ॥९६॥

श्रीशैलं तंतुकायासौ योगगत्या व्यदर्शयत् ।

शिवरात्रिव्रताहे स श्रीदत्तः शरणं मम ॥९७॥

ज्ञापयित्वाप्यमर्त्यत्वं स्वस्य दृष्ट्या चकार यः ।

विकुष्ठं नन्दिशर्माणं श्रीदत्तः शरणं मम ॥९८॥

नरकेसरिणे स्वप्ने स्वं कल्लेश्वरलिङ्गम् ।

दर्शयित्वानुजग्राह श्रीदत्तः शरणं मम ॥९९॥

अष्टमूर्तिधरोऽप्यष्टग्रामगो भक्तवत्सलः ।

दीपावल्युत्सवेऽभूत्स श्रीदत्तः शरणं मम ॥१००॥

अपक्वं छेदयित्वापि क्षेत्रे शतगुणं ततः ।

धान्यं शूद्राय योऽदात्स श्रीदत्तः शरणं मम
॥१०१॥

गाणगापुरके क्षेत्रे योऽष्टतीर्थान्यदर्शयत् ।

भक्तेभ्यो भीमरथ्यां स श्रीदत्तः शरणं मम ॥१०२॥

पूर्वदत्तवरायादाद्राज्यं स्फोटकरुग्घरः ।

म्लेच्छाय दृष्टिं चेष्टं स श्रीदत्तः शरणं मम ॥१०३॥

श्रीशैलयात्रामिषेण वरदः पुष्पपीठगः ।

कलौ तिरोऽभवद्यः स श्रीदत्तः शरणं मम ॥१०४॥

निद्रामातृपुरेऽस्य सह्यशिखरे पोठं मिमंक्षापुरे

काश्याख्ये करहाटकेऽर्घ्यमवरे भिक्षास्य कोलापुरे
।

पाञ्चाले भुजिरस्य विठ्ठलपुरे पत्रं विचित्रं पुरे

गांधर्वे युजिराचमः कुरुपुरे दूरे स्मृतो नान्तरे
॥१०५॥

अमलकमलवक्त्रः पद्मपत्राभनेत्रः

परविरतिकलत्रः सर्वथा यः स्वतन्त्रः ।

स च परमपवित्रः सत्कमण्डल्वमत्रः

परमरुचिरगात्रो योऽनसूयात्रिपुत्रः ॥१०६॥

नमस्ते समस्तेष्टदात्रे विधात्रे
नमस्ते समस्तेडिताघौघहर्त्रे ।
नमस्ते समस्तेङ्गितज्ञाय भर्त्रे
नमस्ते समस्तेष्टकर्त्रेऽकहर्त्रे ॥१०७॥
नमो नमस्तेऽस्तु पुरान्तकाय
नमो नमस्तेऽस्त्वसुरान्तकाय ।
नमो नमस्तेऽस्तु खलान्तकाय
दत्ताय भक्तार्तिविनाशकाय ॥१०८॥
श्रीदत्तदेवेश्वर मे प्रसीद
श्रीदत्तसर्वेश्वर मे प्रसीद ।
प्रसीद योगेश्वर देहि योगं
त्वदीयभक्तेः कुरु मा वियोगम् ॥१०९॥
श्रीदत्तो जयतीह दत्तमनिशं ध्यायामि दत्तेन मे
हृच्छुद्धिर्विहिता ततोऽस्तु सततं दत्ताय तुभ्यं नमः
।

दत्तान्नास्ति परायणं श्रुतिमतं दत्तस्य
दासोऽस्म्यहम् ।

श्रीदत्ते परभक्तिरस्तु मम भो दत्त प्रसीदेश्वर
॥११०॥

॥ इति श्री परमहंस परिव्राजकाचार्य श्री श्री श्री

वासुदेवानन्द सरस्वती यति वरेण्य विरचितं श्री
दत्त

भावसुधारस स्तोत्रं संपूर्णम् ॥

*****************************

दत्तमाला मन्त्र

ॐ नमो भगवते दत्तात्रेयाय, स्मरणमात्रसन्तुष्टाय,

महाभयनिवारणाय महाज्ञानप्रदाय,
चिदानन्दात्मने

बालोन्मत्तपिशाचवेषाय, महायोगिने अवधूताय,

अनसूयानन्दवर्धनाय अत्रिपुत्राय, ॐ
भवबन्धविमोचनाय,

आं असाध्यसाधनाय, ऱ्हीं सर्वविभूतिदाय,

क्रौं असाध्याकर्षणाय, ऐं वाक्प्रदाय, क्लीं
जगत्रयवशीकरणाय,

सौः सर्वमनःक्षोभणाय, श्रीं महासंपत्प्रदाय,

ग्लौं भूमंडलाधिपत्यप्रदाय, द्रां चिरंजीविने,

वषट्वशीकुरु वशीकुरु, वौषट् आकर्षय आकर्षय,

हुं विद्वेषय विद्वेषय, फट् उच्चाटय उच्चाटय,

ठः ठः स्तंभय स्तंभय, खें खें मारय मारय,

नमः संपन्नय संपन्नय, स्वाहा पोषय पोषय,

परमन्त्रपरयन्त्रपरतन्त्राणि छिंधि छिंधि,

ग्रहान्निवारय निवारय, व्याधीन् विनाशय विनाशय,

दुःखं हर हर, दारिद्र्यं विद्रावय विद्रावय,

देहं पोषय पोषय, चित्तं तोषय तोषय,

सर्वमन्त्रस्वरूपाय, सर्वयन्त्रस्वरूपाय,

सर्वतन्त्रस्वरूपाय, सर्वपल्लवस्वरूपाय,

ॐ नमो महासिद्धाय स्वाहा ।

***************************

दत्तात्रेय अपराधक्षमापनस्तोत्रम्

रसज्ञावशातारकं स्वादुलभ्यम्
गृहीतं कदाचिन्न ते नाम दत्त ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥१॥
वियोन्यन्तरे दैवदार्ढ्या विभोप्राग्
गृहीतं कदाचिन्न ते नाम दत्त ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥२॥
मया मातृगर्भस्थितिप्राप्तकष्टात्

गृहीतं कदाचिन्न ते नाम दत्त ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥३॥
मया जातमात्रेण संमोहितेन
गृहीतं कदाचिन्न ते नाम दत्त ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥४॥
मया क्रीडनासक्तचित्तेन बाल्ये
गृहीतं कदाचिन्न ते नाम दत्त ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥५॥
मया यौवनेऽज्ञानतो भोगतोषाद्
गृहीतं कदाचिन्न ते नाम दत्त ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥६॥

मया स्थाविरेनिघ्नसर्वेन्द्रियेण
गृहीतं कदाचिन्न ते नाम दत्त ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥७॥
हृषीकेश मे वाङ्मनःकायजातम्
हरेज्ञानतोऽज्ञानतो विश्वसाक्षिन् ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥८॥
स्मृतो ध्यात आवाहितोऽस्यर्चितो वा
न गीतः स्तुतो वन्दितो वा न जप्तः ।
क्षमस्वापराधं क्षमस्वापराधं
क्षमस्वापराधं प्रभो क्लिन्नचित्त ॥९॥
दयाब्धिर्भवाद्दङ्न सागाश्च मादृग्
भवत्यात्पमन्तोर्भवान्मे शरण्यः ।
यथालम्बनं भूर्हि भूनिःसृतांघ्रे

रिति प्रार्थितं दत्तशिष्येण सारम् ॥१०॥

॥ इति परमपूज्य श्रीमद् वासुदेवानन्दसरस्वती स्वामीमहाराजकृत अपराधक्षमापन स्तोत्रं संपूर्णम् ॥

******************************

दत्तात्रेय अष्टचक्रबीजस्तोत्रम्

दिगंबरं भस्मसुगन्धलेपनं
चक्रं त्रिशूलं डमरुं गदां च ।
पद्मासनस्थं ऋषिदेववन्दितं
दत्तात्रेयध्यानमभीष्टसिद्धिदम् ॥१॥
मूलाधारे वारिजपद्मे सचतुष्के
वंशंषंसं वर्णविशालैः सुविशालैः ।
रक्तं वर्णं श्रीभगवतं गणनाथं
दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥२॥

स्वाधिष्ठाने षट्दलपद्मे तनुलिंगे
बालान्तैस्तद्वर्णविशालैः सुविशालैः ।
पीतं वर्णं वाक्पतिरूपं द्रुहिणं तं
दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥३॥
नाभौ पद्मे पत्रदशांके डफवर्णे
लक्ष्मीकान्तं गरूढारूढं मणिपूरे ।
नीलवर्णं निर्गुणरूपं निगमाक्षं
दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥४॥
हृत्पद्मांते द्वादशपत्रे कठवर्णे
अनाहतांते वृषभारूढं शिवरूपम् ।
सर्गस्थित्यंतां कुर्वाणं धवलांगं
दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥५॥
कंठस्थाने चक्रविशुद्धे कमलान्ते
चंद्राकारे षोडशपत्रे स्वरवर्णे
मायाधीशं जीवशिवं तं भगवंतं

दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥६॥
आज्ञाचक्रे भृकुटिस्थाने द्विदलान्ते
हं क्षं बीजं ज्ञानसमुद्रं गुरूमूर्तिं
विद्युत्वर्णं ज्ञानमयं तं निटिलाक्षं
दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥७॥
मूर्ध्निस्थाने वारिजपद्मे शशिबीजं
शुभ्रं वर्णं पत्रसहस्रे ललनाख्ये
हं बीजाख्यं वर्णसहस्रं तूर्यांतं
दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥८॥
ब्रह्मानन्दं ब्रह्ममुकुन्दं भगवन्तं
ब्रह्मज्ञानं ज्ञानमयं तं स्वयमेव
परमात्मानं ब्रह्ममुनीद्रं भसिताङ्गं
दत्तात्रेयं श्रीगुरूमूर्तिं प्रणतोऽस्मि ॥९॥
******************************

दत्तात्रेयप्रार्थनास्तोत्रम्

श्रीपाद श्रीवल्लभ त्वं सदैव । श्रीदत्तास्मान्पाहि देवाधिदेव ॥

भावग्राह्य क्लेशहारिन्सुकीर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥१॥

त्वं नो माता त्वं पिताप्तोऽधिपस्त्वम् । त्राता योगक्षेमकृत्सद्गुरुस्त्वम् ॥

त्वं सर्वस्वं नोऽप्रभो विश्वमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥२॥

पापं तापं व्याधिमाधिं च दैन्यम् । भीतिं क्लेशं त्वं हराशु त्वदन्यम् ॥

त्रातारं नो वीक्ष्य ईशास्तजूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥३॥

नान्यस्त्राता नापि दाता न भर्ता । त्वत्तो देव त्वं शरण्योऽकहर्ता ॥

कुर्वात्रेयानुग्रहं पूर्णराते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥४॥

धर्मे प्रीतिं सन्मतिं देवभक्तिम् । सत्संगाप्तिं देहि भुक्तिं च मुक्तिम् ।

भावासक्तिं चाखिलानंदमूर्ते ।
घोरात्कष्टादुद्धरास्मान्नमस्ते ॥५॥

श्लोकपंचकमेततद्यो लोकमङ्गलवर्धनम् ।

प्रपठेन्नियतो भक्त्या स श्रीदत्तप्रियो भवेत् ॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं

श्रीदत्तात्रेयप्रार्थनास्तोत्रं संपूर्णम् ॥

****************************

दत्तस्तवस्त्रोत्र

भूतप्रेतपिशाचाद्या यस्य स्मरणमात्रतः ॥

दूरादेव पलायन्ते दत्तात्रेयं नमामि तं ॥१॥

यन्नमस्मरणाद्-दैन्यं पापं तापश्च नश्यति ॥

भीतिग्रहर्तिदु:स्वप्नं दत्तात्रेयं नमामि तं ॥२॥

दद्रुस्फोटककुष्ठादि महामारी विषूचिका ॥
नश्यन्ति अन्येSपि रोगाश्च दत्तात्रेयं नमामि तं ॥३॥
संगजा देशकालोत्था अपि सांक्रमिका गदा: ॥
शाम्यन्ति यत्स्मरणतो दत्तात्रेयं नमामि तं ॥४॥
सर्पवृश्चिकदष्टानां विषार्तानां शरीरिणाम ॥
यन्नाम शान्तिदं शीघं दत्तात्रेयं नमामि तं ॥५॥
त्रिविधोत्पातशमनं विविधारिष्टनाशनम ॥
यन्नाम क्रूरभीतिघ्नं दत्तात्रेयं नमामि तं ॥६॥
वैयादिकृतमन्त्रादिप्रयोगा यस्य कीर्तनात ॥
नश्यन्ति देवबाधाश्च दत्तात्रेयं नमामि तं ॥७॥
यच्छिष्यस्मरणात्सद्यो गतनष्टादि लभ्यते ॥
य ईश: सर्वतस्त्राता दत्तात्रेयं नमामि तं ॥८॥
जयलाभयशःकामदातुर्दत्तस्य यः स्तवम ॥
भोगमोक्षप्रदस्येमं पठेद्-दत्तप्रियो भवेत ॥९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं
दत्तस्तवस्तोत्रं संपूर्णम ॥

***************************

## दत्त भावसुधारस स्तोत्रम्

दत्तात्रेयं परमसुखमयं वेदगेयं ह्यमेयं
योगिध्येयं हृतनिजभयं स्वीकृतानेककायम् ।
दुष्टागम्यं विततविजयं देवदैत्यर्षिवन्द्यं
वन्दे नित्यं विहितविनयं चाव्ययं भावगम्यम् ॥१॥
दत्तात्रेय नमोऽस्तु ते भगवते पापक्षयं कुर्वते
दारिद्र्यं हरते भयं शमयते कारुण्यमातन्वते ।
भक्तानुद्धरते शिवं च ददते सत्कीर्तिमातन्वते
भूतान्द्रावयते वरं प्रददते श्रेयः पते सद्गते ॥२॥
एकं सौभाग्यजनकं तारकं लोकनायकम् ।
विशोकं त्रातभजकं नमस्ये कामपूरकम् ॥३॥

नित्यं स्मरामि ते पादे हतखेदे सुखप्रदे ।
प्रदेहि मे शुद्धभावं भावं यो वारयेद्द्रुतम् ॥४॥

समस्तसंपत्प्रदमार्तबंधुं
समस्तकल्याणदमस्तबंधुम् ।
कारुण्यसिंधुं प्रणमामि दत्तं यः शोधयत्याशु
मलीनचित्तम् ॥५॥

समस्तभूतांतरबाह्यवर्ती यश्चात्रिपुत्रो यतिचक्रवर्ती
।
सुकीर्तिसंव्याप्तदिगंतरालः स पातु मां
निर्जितभक्तकालः ॥६॥

व्याध्याधिदारिद्र्यभयार्तिहर्ता
स्वगुप्तयेऽनेकशरीरधर्ता
स्वदासभर्ता बहुधा विहर्ता कर्ताप्यकर्ता
स्ववशोऽरिहर्ता ॥७॥

स चानसूयातनयोऽभवद्यो विष्णुः स्वयं
भाविकरक्षणाय ।

गुणा यदीया म हि बुद्धिमद्भिर्गण्यंत
आकल्पमपीह धात्रा ॥८॥

न यत्कटाक्षामृतवृष्टितोऽत्र

तिष्ठन्ति तापाः सकलाः परत्र ।

यः सद्गतिं संप्रददाति भूमा

स मेऽन्तरे तिष्ठतु दिव्यधामा ॥९॥

स त्वं प्रसीदात्रिसुतार्तिहारिन्

दिगम्बर स्वीयमनोविहारिन् ।

दुष्टा लिपिर्या लिखितात्र धात्रा

कार्या त्वया साऽतिशुभा विधात्रा ॥१०॥

सर्वमंगलसंयुक्त सर्वैश्वर्यसमन्वित ।

प्रसन्ने त्वयि सर्वेशे किं केषां दुर्लभं कुह ॥११॥

हार्दांधतिमिरं हन्तुं शुद्धज्ञानप्रकाशक ।

त्वदंघ्रिनखमाणिक्यद्युतिरेवालमीश नः ॥१२॥

स्वकृपार्द्रकटाक्षेण वीक्षसे चेत्सकृद्धि माम् ।

भविष्यामि कृतार्थोऽत्र पात्रं चापि स्थितेस्तव ॥१३॥

क्व च मन्दो वराकोऽहं क्व भवान्भगवान्प्रभुः ।

अथापि भवदावेश भाग्यवानस्मि ते दृशा ॥१४॥

विहितानि मया नाना पातकानि च यद्यपि ।

अथापि ते प्रसादेन पवित्रोऽहं न संशयः ॥१५॥

स्वलीलया त्वं हि जनान्पुनासि

तन्मे स्वलीला श्रवणं प्रयच्छ ।

तस्याः श्रुतेः सान्द्रविलोचनोऽहं

पुनामि चात्मानमतीव देव ॥१६॥

पुरतस्ते स्फुटं वच्मि दोषराशिरहं किल ।

दोषा ममामिताः पांसुवृष्टिबिन्दुसमा विभोः ॥१७॥

पापीयसामहं मुख्यस्त्वं तु कारुणिकाग्रणीः ।

दयनीयो न हि क्वापि मदन्य इति भाति मे ॥१८॥

ईदृशं मां विलोक्यापि कृपालो ते मनो यदि ।

न द्रवेत्तर्हि किं वाच्यमदृष्टं मे तवाग्रतः ॥१९॥

त्वमेव सृष्टवान्सर्वान्दत्तात्रेय दयानिधे ।

वयं दीनतराः पुत्रास्तवाकल्पाः स्वरक्षणे ॥२०॥

जयतु जयतु दत्तो देवसङ्घाभिपूज्यो

जयतु जयतु भद्रो भद्रदो भावुकेज्यः ।

जयतु जयतु नित्यो निर्मलज्ञानवेद्यो

जयतु जयतु सत्यः सत्यसंधोऽनवद्यः ॥२१॥

यद्यहं तव पुत्रः स्यां पिता माता त्वमेव मे ।

दयास्तन्यामृतेनाशु मातस्त्वमभिषिञ्च माम्
॥२२॥

ईशाभिन्ननिमित्तोपादनात्स्रष्टुरस्य ते ।

जगद्योने सुतो नाहं दत्त मां परिपाह्यतः ॥२३॥

तव वत्सस्य मे वाक्यं सूक्तं वाऽसूक्तमप्यहो ।

क्षन्तव्यं मेऽपराधश्च त्वत्तोऽन्या न गतिर्हि मे
॥२४॥

अनन्यगतिकस्यास्य बालस्य मम ते पितः ।
न सर्वथोचितोपेक्षा दोषाणां गणनापि च ॥२५॥
अज्ञानित्वादकल्पत्वाद्दोषा मम पदे पदे ।
भवन्ति किं करोमीश करुणावरुणालय ॥२६॥
अथापि मेऽपराधैश्चेदायास्यन्तर्विषादताम् ।
पदाहतार्भकेणापि माता रुष्यति किं भुवि ॥२७॥
रङ्कमङ्कगतं दीनं ताडयन्तं पदेन च ।
माता त्यजति किं बालं प्रत्युताश्वासयत्यहो ॥२८॥
तादृशं मामकल्पं चेन्नाश्वासयसि भो प्रभो ।
अहहा बत दीनस्य त्वां विना मम का गतिः ॥२९॥
शिशुर्नायं शठः स्वार्थीत्यपि नायातु तेऽन्तरम् ।
लोके हि क्षुधिता बालाः स्मरन्ति निजमातरम् ॥३०॥
जीवनं भिन्नयोः पित्रोर्लोक एकतराच्छिशोः ।
त्वं तूभयं दत्त मम माऽस्तु निर्दयता मयि ॥३१॥

स्तवनेन न शक्तोऽस्मि त्वां प्रसादयितुं प्रभो ।
ब्रह्माद्याश्चकितास्तत्र मन्दोऽहं शक्नुयां कथम्
॥३२॥

दत्त त्वद्बालवाक्यानि सूक्तासूक्तानि यानि च ।
तानि स्वीकुरु सर्वज्ञ दयालो भक्तभावन ॥३३॥

ये त्वा शरणमापन्नाः कृतार्था अभवन्हि ते ।
एतद्विचार्य मनसा दत्त त्वां शरणं गतः ॥३४॥

त्वन्निष्ठास्त्वत्परा भक्तास्तव ते सुखभागिनः ।
इति शास्त्रानुरोधेन दत्त त्वां शरणं गतः ॥३५॥

स्वभक्ताननुगृह्णाति भगवान् भक्तवत्सलः ।
इति सञ्चित्य सञ्चित्य कथञ्चिद्धारयाम्यसून्
॥३६॥

त्वद्भक्तस्त्वदधीनोऽहमस्मि तुभ्यं समर्पितम् ।
तनुं मनो धनं चापि कृपां कुरु ममोपरि ॥३७॥

त्वयि भक्तिं नैव जाने न जानेऽर्चनपद्धतिम् ।

कृतं न दानधर्मादि प्रसादं कुरु केवलम् ॥३८॥
ब्रह्मचर्यादि नाचीर्णं नाधीता विधितः श्रुतिः ।
गार्हस्थ्यं विधिना दत्त न कृतं तत्प्रसीद मे ॥३९॥
न साधुसङ्गमो मेऽस्ति न कृतं वृद्धसेवनम् ।
न शास्त्रशासनं दत्त केवलं त्वं दयां कुरु ॥४०॥
ज्ञातेऽपि धर्मे नहि मे प्रवृत्ति
र्ज्ञातेऽप्यधर्मे न ततो निवृत्तिः ॥
श्रीदत्तनाथेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥४१॥
कृतिः सेवा गतिर्यात्रा स्मृतिश्चिन्ता स्तुतिर्वचः ।
भवन्तु दत्त मे नित्यं त्वदीया एव सर्वथा ॥४२॥
प्रतिज्ञा ते न भक्ता मे नश्यन्तीति सुनिश्चितम् ।
श्रीदत्त चित्त आनीय जीवनं धारयाम्यहम् ॥४३॥
दत्तोऽहं ते मयेतीश आत्मदानेन योऽभवत् ।
अनसूयात्रिपुत्रः स श्रीदत्तः शरणं मम ॥४४॥

कार्तवीर्यार्जुनायादाद्योगर्धिमुभयीं प्रभुः ।
अव्याहतगतिं चासौ श्रीदत्तः शरणं मम ॥४५॥
आन्वीक्षिकीमलर्काय विकल्पत्यागपूर्वकम् ।
योऽदादाचार्यवर्यः स श्रीदत्तः शरणं मम ॥४६॥
चतुर्विंशतिगुर्वाप्तं हेयोपादेयलक्षणं ।
ज्ञानं यो यदवेऽदात्स श्रीदत्तः शरणं मम ॥४७॥
मदालसागर्भरत्नालर्काय प्राहिणोच्च यः ।
योगपूर्वात्मविज्ञानं श्रीदत्तः शरणं मम ॥४८॥
आयुराजाय सत्पुत्रं सेवाधर्मपराय यः ।
प्रददौ सद्गतिं चैष श्रीदत्तः शरणं मम ॥४९॥
लोकोपकृतये विष्णुदत्तविप्राय योऽर्पयत् ।
विद्यास्तच्छ्राद्धभुग्यः स श्रीदत्तः शरणं मम ॥५०॥
भर्त्रा सहानुगमनविधिं यः प्राह सर्ववित् ।
राममात्रे रेणुकायै श्रीदत्तः शरणं मम ॥५१॥
समूलमाह्निकं कर्म सोमकीर्तिनृपाय यः ।

मोक्षोपयोगि सकलं श्रीदत्तः शरणं मम ॥५२॥
नामधारक भक्ताय निर्विण्णाय व्यदर्शयत् ।
तुष्टः स्तुत्या स्वरूपं स श्रीदत्तः शरणं मम ॥५३॥
यः कलिब्रह्मसंवादमिषेणाह युगस्थितीः ।
गुरुसेवां च सिद्धाऽऽस्याच्छ्रीदत्तः शरणं मम ॥५४॥
दुर्वासःशापमाश्रुत्य योऽम्बरीषार्थमव्ययः ।
नानावतारधारी स श्रीदत्तः शरणं मम ॥५५॥
अनसूयासतीदुग्धास्वादायेव त्रिरूपतः ।
अवातरदजो योऽपि श्रीदत्तः शरणं मम ॥५६॥
पीठापुरे यः सुमतिब्राह्मणीभक्तितोऽभवत् ।
श्रीपादस्तत्सुतस्त्राता श्रीदत्तः शरणं मम ॥५७॥
प्रकाशयामास सिद्धमुखात्स्थापनमादितः ।
महाबलेश्वरस्यैष श्रीदत्तः शरणं मम ॥५८॥
चण्डाल्यपि यतो मुक्ता गोकर्णे तत्र योऽवसत् ।

लिङ्गतीर्थमये त्र्यब्दं श्रीदत्तः शरणं मम ॥५९॥
कृष्णाद्वीपे कुरुपुरे कुपुत्रं जननीयुतम् ।
यो हि मृत्योरपाच्छ्रीपाच्छ्रीदत्तः शरणं मम ॥६०॥
रजकायापि दास्यन्यो राज्यं कुरुपुरे प्रभुः ।
तिरोऽभूदज्ञदृष्ट्या स श्रीदत्तः शरणं मम ॥६१॥
विश्वासघातिनश्चोरान्स्वभक्तघ्नान्निहत्य यः ।
जीवयामास भक्तं स श्रीदत्तः शरणं मम ॥६२॥
करञ्जनगरेऽम्बायाः प्रदोषव्रतसिद्धये ।
योऽभूत्सुतो नृहर्याख्यः श्रीदत्तः शरणं मम ॥६३॥
मूको भूत्वा व्रतात्पश्चाद्वदन्वेदान्स्वमातरम् ।
प्रव्रजन् बोधयामास श्रीदत्तः शरणं मम ॥६४॥
काशीवासी स संन्यासी निराशीष्ट्वप्रदो वृषम् ।
वैदिकं विशदीकुर्वन् श्रीदत्तः शरणं मम ॥६५॥
भूमिं प्रदक्षिणीकृत्य सशिष्यो वीक्ष्य मातरम् ।
जहार द्विजशूलार्तिं श्रीदत्तः शरणं मम ॥६६॥

शिष्यत्वेनोररीकृत्य सायंदेवं ररक्ष यः ॥
भीते च क्रूरयवनाच्छ्रीदत्तः शरणं मम ॥६७॥
प्रेरयत्तीर्थयात्रायै तीर्थरूपोऽपि यः स्वकान् ।
सम्यग्धर्ममुपादिश्य श्रीदत्तः शरणं मम ॥६८॥
सशिष्यः पर्यलीक्षेत्रे वैद्यनाथसमीपतः ।
स्थित्वोद्दधार मूढो यः श्रीदत्तः शरणं मम ॥६९॥
विद्वत्सुतमविद्यं यो आगतं लोकनिन्दितम् ।
छिन्नजिह्वं बुधं चक्रे श्रीदत्तः शरणं मम ॥७०॥
नृसिंहवाटिकास्थो यः प्रददौ शाकभुङ्निधिम् ।
दरिद्रब्राह्मणायासौ श्रीदत्तः शरणं मम ॥७१॥
भक्ताय त्रिस्थलीयात्रां दर्शयामास यः क्षणात् ।
चकार वरदं क्षेत्रं स श्रीदत्तः शरणं मम ॥७२॥
प्रेतार्तिं वारयित्वा यो ब्राह्मण्यै भक्तिभावितः ।
ददौ पुत्रौ स गतिदः श्रीदत्तः शरणं मम ॥७३॥
तत्त्वं यो मृतपुत्रायै बोधयित्वाप्यजीवयत् ।

मृतं कल्पद्रुमस्थः स श्रीदत्तः शरणं मम ॥७४॥
दोहयामास भिक्षार्थं यो वन्ध्यां महिषीं प्रभुः ।
दारिद्र्यदावदावः स श्रीदत्तः शरणं मम ॥७५॥
राजप्रार्थित एत्यास्थान्मठे यो गाणगापुरे ।
ब्रह्मरक्षः समुद्धर्ता श्रीदत्तः शरणं मम ॥७६॥
विश्वरूपं निन्दकाय शिबिकास्थः स्वलङ्कृतः ।
गर्वहा दर्शयद्यः स श्रीदत्तः शरणं मम ॥७७॥
त्रिविक्रमेण चानीतौ गर्वितौ ब्राह्मणद्विषौ ।
बोधयामास तौ यः स श्रीदत्तः शरणं मम ॥७८॥
उक्त्वा चतुर्वेदशाखातदङ्गादिकमीश्वरः ।
विप्रगर्वहरो यः स श्रीदत्तः शरणं मम ॥७९॥
सप्तजन्मविदं सप्तरेखोल्लङ्घनतो ददौ ।
यो हीनाय श्रुतिस्फूर्तिः श्रीदत्तः शरणं मम ॥८०॥
त्रिविक्रमायाह कर्मगतिं दत्तविदा पुनः ।
वियुक्तं पतितं चक्रे श्रीदत्तः शरणं मम ॥८१॥

रक्षसे वामदेवेन भस्ममाहात्म्यमुद्गतिम् ।
उक्तां त्रिविक्रमायाह श्रीदत्तः शरणं मम ॥८२॥
गोपीनाथसुतो रुग्णो मृतस्तत्स्त्री शुशोच ताम् ।
बोधयामास यो योगी श्रीदत्तः शरणं मम ॥८३॥
गुर्वगस्त्यर्षिसंवादरूपं स्त्रीधर्ममाह यः ।
रूपान्तरेण स प्राज्ञः श्रीदत्तः शरणं मम ॥८४॥
विधवाधर्ममादिश्यानुगमं चाक्षभस्मदः ।
अजीवयन्मृतं विप्रं श्रीदत्तः शरणं मम ॥८५॥
वेश्यासत्यै तु रुद्राक्षमाहात्म्ययुतमीट्कृतम् ।
प्रसादं प्राह यः सत्यै श्रीदत्तः शरणं मम ॥८६॥
शतरुद्रीयमाहात्म्यं मृतराट् सुतजीवनम् ।
सत्यै शशंस स गुरुः श्रीदत्तः शरणं मम ॥८७॥
कचाख्यानं स्त्रियो मंत्रानर्हतार्थसुभाग्यदम् ।
सोमव्रतं च यः प्राह श्रीदत्तः शरणं मम ॥८८॥
ब्राह्मण्या दुःस्वभावं यो निवार्याह्निकमुत्तमम् ।

शशंस ब्राह्मणायासौ श्रीदत्तः शरणं मम ॥८९॥
गार्हस्थधर्मं विप्राय प्रत्यवायजिहासया ।
क्रममुक्त्यै य ऊचे स श्रीदत्तः शरणं मम ॥९०॥
त्रिपुंपर्याप्तपाकेन भोजयामास यो नृणाम् ।
सिद्धश्चतुःसहस्राणि श्रीदत्तः शरणं मम ॥९१॥
अश्वत्थसेवामादिश्य पुत्रौ योऽदात्फलप्रदः ।
चित्रकृद्वृद्धवन्ध्यायै श्रीदत्तः शरणं मम ॥९२॥
कारयित्वा शुष्ककाष्ठसेवां तद्वृक्षतां नयन् ।
विप्रकुष्ठं जहारासौ श्रीदत्तः शरणं मम ॥९३॥
भजन्तं कष्टतोऽप्याह सायंदेवं परीक्ष्य यः ।
गुरुसेवाविधानं स श्रीदत्तः शरणं मम ॥९४॥
शिवतोषकरीं काशीयात्रां भक्ताय योऽवदत् ।
सविधिं विहितां त्वष्ट्रा श्रीदत्तः शरणं मम ॥९५॥
कौण्डिण्यधर्मविहितमनंतव्रतमाह यः ।
कारयामास तद्योऽपि श्रीदत्तः शरणं मम ॥९६॥

श्रीशैलं तंतुकायासौ योगगत्या व्यदर्शयत् ।
शिवरात्रिव्रताहे स श्रीदत्तः शरणं मम ॥९७॥
ज्ञापयित्वाप्यमर्त्यत्वं स्वस्य दृष्ट्या चकार यः ।
विकुष्ठं नन्दिशर्माणं श्रीदत्तः शरणं मम ॥९८॥
नरकेसरिणे स्वप्ने स्वं कल्लेश्वरलिङ्गगम् ।
दर्शयित्वानुजग्राह श्रीदत्तः शरणं मम ॥९९॥
अष्टमूर्तिधरोऽप्यष्टग्रामगो भक्तवत्सलः ।
दीपावल्युत्सवेऽभूत्स श्रीदत्तः शरणं मम ॥१००॥
अपक्वं छेदयित्वापि क्षेत्रे शतगुणं ततः ।
धान्यं शूद्राय योऽदात्स श्रीदत्तः शरणं मम
॥१०१॥
गाणगापुरके क्षेत्रे योऽष्टतीर्थान्यदर्शयत् ।
भक्तेभ्यो भीमरथ्यां स श्रीदत्तः शरणं मम ॥१०२॥
पूर्वदत्तवरायादाद्राज्यं स्फोटकरुग्घरः ।
म्लेच्छाय दृष्टिं चेष्टं स श्रीदत्तः शरणं मम ॥१०३॥

श्रीशैलयात्रामिषेण वरदः पुष्पपीठगः ।
कलौ तिरोऽभवद्यः स श्रीदत्तः शरणं मम ॥१०४॥
निद्रामातृपुरेऽस्य सह्यशिखरे पोठं मिमंक्षापुरे
काश्याख्ये करहाटकेऽर्घ्यमवरे भिक्षास्य कोलापुरे
।
पाञ्चाले भुजिरस्य विठ्ठलपुरे पत्रं विचित्रं पुरे
गांधर्वे युजिराचमः कुरुपुरे दूरे स्मृतो नान्तरे
॥१०५॥
अमलकमलवक्त्रः पद्मपत्राभनेत्रः
परविरतिकलत्रः सर्वथा यः स्वतन्त्रः ।
स च परमपवित्रः सत्कमण्डल्वमत्रः
परमरुचिरगात्रो योऽनसूयात्रिपुत्रः ॥१०६॥
नमस्ते समस्तेष्टदात्रे विधात्रे
नमस्ते समस्तेडिताघौघहर्त्रे ।
नमस्ते समस्तेङ्गितज्ञाय भर्त्रे

नमस्ते समस्तेष्टकर्त्रेऽकहर्त्रे ॥१०७॥

नमो नमस्तेऽस्तु पुरान्तकाय

नमो नमस्तेऽस्त्वसुरान्तकाय ।

नमो नमस्तेऽस्तु खलान्तकाय

दत्ताय भक्तार्तिविनाशकाय ॥१०८॥

श्रीदत्तदेवेश्वर मे प्रसीद

श्रीदत्तसर्वेश्वर मे प्रसीद ।

प्रसीद योगेश्वर देहि योगं

त्वदीयभक्तेः कुरु मा वियोगम् ॥१०९॥

श्रीदत्तो जयतीह दत्तमनिशं ध्यायामि दत्तेन मे

हृच्छुद्धिर्विहिता ततोऽस्तु सततं दत्ताय तुभ्यं नमः ।

दत्तान्नास्ति परायणं श्रुतिमतं दत्तस्य दासोऽस्म्यहम् ।

श्रीदत्ते परभक्तिरस्तु मम भो दत्त प्रसीदेश्वर ॥११०॥

॥ इति श्री परमहंस परिव्राजकाचार्य श्री श्री श्री वासुदेवानन्द सरस्वती यति वरेण्य विरचितं श्री दत्त भावसुधारस स्तोत्रं संपूर्णम् ॥

**************************

श्रीदत्तात्रेयप्रार्थनास्तोत्रम्

श्रीपाद श्रीवल्लभ त्वं सदैव ।

श्रीदत्तास्मान्पाहि देवाधिदेव ॥

भावग्राह्य क्लेशहारिन्सुकीर्ते ।

घोरात्कष्टादुद्धरास्मान्नमस्ते ॥१॥

त्वं नो माता त्वं पिताप्तोऽधिपस्त्वम् ।

त्राता योगक्षेमकृत्सद्गुरुस्त्वम् ॥

त्वं सर्वस्वं नोऽप्रभो विश्वमूर्ते ।

घोरात्कष्टादुद्धरास्मान्नमस्ते ॥२॥

पापं तापं व्याधिमाधिं च दैन्यम् ।

भीतिं क्लेशं त्वं हराशु त्वदन्यम् ॥

त्रातारं नो वीक्ष्य ईशास्तजूर्ते ।

घोरात्कष्टादुद्धरास्मान्नमस्ते ॥३॥

नान्यस्त्राता नापि दाता न भर्ता ।

त्वत्तो देव त्वं शरण्योऽकहर्ता ॥

कुर्वत्रेयानुग्रहं पूर्णराते ।

घोरात्कष्टादुद्धरास्मान्नमस्ते ॥४॥

धर्मे प्रीतिं सन्मतिं देवभक्तिम् ।

सत्संगाप्तिं देहि भुक्तिं च मुक्तिम् ।

भावासक्तिं चाखिलानंदमूर्ते ।

घोरात्कष्टादुद्धरास्मान्नमस्ते ॥५॥

श्लोकपंचकमेतत्द्यो लोकमङ्गलवर्धनम् ।

प्रपठेन्नियतो भक्त्या स श्रीदत्तप्रियो भवेत् ॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं
श्रीदत्तात्रेयप्रार्थनास्तोत्रं संपूर्णम् ॥

************************

## घोर कष्टोद्धारण स्तोत्रम्

श्रीपाद श्रीवल्लभ त्वं सदैव
श्रीदत्तास्मान् पाहि देवाधिदेव ।
भवग्रहक्लेशहारिन् सुकीर्ते
घोरकष्टाद् उद्धरास्मान् नमस्ते ॥१॥
त्वं नो माता त्वं पिताप्तोऽधिपस्त्वम्
त्राता योगक्षेमकृत् सद्गुरुस्त्वम् ।
त्वं सर्वस्वं नो प्रभो विश्वमूर्ते
घोरकष्टाद् उद्धरास्मान् नमस्ते ॥२॥
पापं तापं व्याध्यादीं च दैन्यम्
भीतिं क्लेशं त्वं हराशु त्वदन्यम् ।
त्रातारं नो वीक्ष इषास्तजूर्ते
घोरकष्टाद् उद्धरास्मान् नमस्ते ॥३॥

नान्यस्त्राता न पीडान् न भर्ता

त्वत्तो देव त्वं शरण्यो शोकहर्ता ।

कुर्वत्रेय अनुग्रहं पूर्णरते

घोरकष्टाद् उद्धरास्मान् नमस्ते ॥४॥

धर्मे प्रीतिं सन्मतिं देवभक्तिं

सत्सङ्गाप्तिं देहि भुक्तिं च मुक्तिम्

भाव शक्तिं च अखिलानन्दमूर्ते

घोरकष्टाद् उद्धरास्मान् नमस्ते ॥५॥

श्लोकपञ्चकमेतद्यो लोकमङ्गलवर्धनम् ।

प्रपत्तेन नियतो भक्त्या स श्री दत्तप्रियो भवेत्
॥६॥

इति श्रीमत् परमहंस परिव्राजकाचार्य

श्रीमद् वासुदेवानन्द सरस्वती स्वामी विरचितं

घोर कष्टोद्धारण स्तोत्रं सम्पूर्णम् ॥

**************************

## दत्तात्रेयस्तोत्र

॥ॐ ॥

दत्तात्रेयं प्रियदैवतं सर्वात्मकं विश्वम्भरम् ।

करुणार्णवं विपदाहरं चिन्मयं प्रणमाम्यहम् ॥१॥

बालरूपं हास्यवदनं शंखचक्रयुतं प्रभुम् ।

धेनुसहितं त्रिशुलपाणिं चिन्मयं प्रणमाम्यहम् ॥२॥

षड्भुजं स्तवनप्रियं त्रिगुणात्मकं भवतारकम् ।

शिवकारकं सुरवंदितं चिन्मयं प्रणमाम्यहम् ॥३॥

प्रणवगायनतोषितं प्रणवपद्मैः पूजितम् ।

प्रणवात्मकं परमेश्वरं चिन्मयं प्रणमाम्यहम् ॥४॥

कोटिभास्करसदृशं तेजस्विनं तेजोमयम् ।

सद्गुरूं गुरूणां गुरूं चिन्मयं प्रणमाम्यहम् ॥५॥

विश्वनाटकचालकं ज्ञानगम्यं निर्गुणम् ।

भक्तकारणसम्भूतं चिन्मयं प्रणमाम्यहम् ॥६॥

बालयोगिध्यानमग्नं त्रिविधतापनिवारकम् ।

दीननाथं सिद्धिदं चिन्मयं प्रणमाम्यहम् ॥७॥

जनकजननीबंधुसुहृदाः आप्तसर्वास्त्वं मम ।

एहि एहि स्मर्तृगामिन् चिन्मय प्रकटी भव ॥८॥

**************************

श्रीदत्तात्रेय जय दत्तात्रेय

॥ॐ ॥

श्री गुरूदेवाय नमः । श्रीगुरूदत्तात्रेयाय नमः ।

श्रीदत्तात्रेय जय दत्तात्रेय

जय परमात्मन् करुणासागर ।

जय जगदीश्वर जय विश्वम्भर

जय दत्तात्रेय दत्त दिगम्बर ॥१॥

अनुसूयात्मज हरिहरब्रह्मन्

बटुवेषित सुकुमार मनोहर ।

अत्रितनय जय पतितपावन
जय दत्तात्रेय जय दत्तात्रेय ॥२॥
हे त्रिगुणात्मक त्रिगुणरहित जय
त्रिभुवननायक जय भवतारक ।
कृतांतभयहर दीनदयाघन
जय दत्तात्रेय जय दत्तात्रेय ॥३॥
कौपिनधारिन् जटामुकुटधर
दंडकमंडलुमंडितकर जय ।
वटमूलस्थित स्मितमुखनिर्मल
जय दत्तात्रेय जय दत्तात्रेय ॥४॥
चंदनचर्चित भस्मविलेपित
सिद्धासनयुत जय योगेश्वर ।
जय श्रीपादश्रीवल्लभ जय
जय दत्तात्रेय जय दत्तात्रेय ॥५॥
ध्यानमग्न जय मुनिवर मंगल

नवनीरजसममिलीतलोचन ।
नवनाथप्रिय अलखनिरंजन
जय दत्तात्रेय जय दत्तात्रेय ॥६॥
ज्ञानसुधारसवर्षन् जय जय
श्रीनृसिंह जय रजकोद्धारक ।
सिद्धपुरूष जय समर्थस्वामिन्
जय दत्तात्रेय जय दत्तात्रेय ॥७॥
परब्रह्म विश्वात्मक जय हे
एक नित्य जय अनंत जय जय
वेदनिवेदित नेति नेति जय
जय दत्तात्रेय जय दत्तात्रेय ॥८॥
ज्योतिर्मय जय तेजोगिरि जय
आनंदघन सच्चिदानन्द जय ।
प्रणवात्मक जय हृत्कमलस्थित
दत्तस्वामिन् जय दत्तात्रेय ॥९॥

हे शाश्वत विश्वेश्वर भगवन्

मुक्तिप्रदाता महादेव जय ।

श्रीदत्तात्रेय जय दत्तात्रेय ॥

जय जय दत्तात्रेय दत्तात्रेय ॥१०॥

॥ॐ नमो भगवते दत्तात्रेयाय ॥

*****************************

दत्तात्रेय योग शास्त्र

नृसिंहरूपिणे चिदात्मने सुखस्वरूपिणे ।

पदैः त्रिभिः तदादिभिः निरूपिताय वै नमः ॥१॥

सांकृतिः मुनिवर्यो असौ भूतये योगलिप्सया ।

भुवं सर्वां परिभ्रान्यन्नैमिषारण्यमाप्तवान् ॥२॥

सुगन्धिनानाकुसुमैः स्वादुसत्फलसंयुतैः ।

शाखिभिः सहितं पुण्यं जलकासारमण्डितम्
॥३॥

सः मुनिः विचरस्तत्र ददर्शाम्रतरोः अधः ।
वेदिकायां समासीनं दत्तात्रेयं महामुनिम् ॥४॥
बद्धपद्मासनासीनं नासाग्रार्पितया दृशा ।
ऊरुमध्यगतोत्तानपाणियुग्मेन शोभितम् ॥५॥
ततः प्रणम्याखिलं दत्तात्रेयं महामुनिम् ।
तत् शिष्यैः सह तत्रैव सम्मुखश्चोपविष्टवान् ॥६॥
तदैव सः मुनिः योगात् विरम्य स्वपुरः स्थितम् ।
उवाच सांकृतिं प्रितिपूर्वकं स्वागतं वचः ॥७॥
सांकृते कथय त्वं मां किमुद्दिश्येहागतः ।
इति पृष्टस्तु सः प्राह योगं ज्ञातुमिहागतः ॥८॥
योगो हि बहुधा ब्रह्मन्तत्सर्वं कतयामि ते ।
मन्त्रयोगो लयश्चैव हठयोगस्तथैव च ।
रजयोगश्चतुर्थः स्यात्योगानामुत्तमस्तु सः ॥९॥
आरम्भश्च घटश्चैव तथा परिचयः स्मृतः ।
निष्पत्तिश्चेत्यवस्था च चतुर्थी परिकल्पिता ।

एतेषां विस्तरं वक्ष्ये यदि त्वं श्रोतुमिच्छसि ॥१०॥

अङ्गेषु मातृका पूर्वं मन्त्रं जपन् सुधीः ।

य कचनाभिसिद्ध्यै स्यात् मन्त्रयोगः स कथ्यते ॥११॥

मृदुः तस्याधिकारी स्याद्द्वादशाब्दैः तु साधनात् ।

प्रायेण लभते ज्ञानं सिद्धिश्चैवाणिमादिकाः ॥१२॥

अल्पबुद्धिः इमं योगं सेवते साधकाधमः ।

मन्त्रयोगो ह्ययं प्रोक्तो योगानामधमस्तु सः ॥१३॥

लययोगश्चित्तलयः संकेतैः तु प्रजायते ।

आदिनाथेन संकेता अष्टकोटि प्रकीर्त्तिताः ॥१४॥

सांकृतिरुवाच --

भगवन्नादिनाथः सः किं रूपः कः सः उच्यताम् ।

दत्तात्रेय उवाच --

महादेवस्य नामान्यादिनाथादिकान्यपि ।

शिवेश्वरश्च देवोऽसौ लीलया व्यचरत्प्रभुः ॥१५॥

श्रीकण्ठपर्वते गौर्या सह प्रमथनायकान् ।
हिमाक्षपर्वते चैवकदलीवनगोचरे ॥१६॥
गिरिकूटे चित्रकूटे सुपादपयुते गिरौ ।
कृपयैकैकसंकेतं शंकरः प्राह तत्र तान् ॥१७॥
तानि सर्वाणि वक्तुं तु न हि शक्नोमि विस्तरात् ।
कानिचित्कथयिष्यामि सहजाभ्यासवत्सुखम्
॥१८॥
तिष्ठन् गच्छन्स्वपन्भुञ्जन्ध्यायन्शून्यमहर्निशम् ।
अयमेको हि संकेतः आदिनाथेन भाषितः ॥१९॥
नासाग्रदृष्टिमात्रेण ह्यपरः परिकीर्तितः ।
शिरस्पश्चाच्च भागस्य ध्यानं मृत्युं जयेत् परम्
॥२०॥
भ्रूमध्यदृष्टिमात्रेण परः संकेतः उच्यते ।
ललाते भ्रूतले यश्चोत्तमः सः प्रकीत्तितः ॥२१॥
सव्यदक्षिणपादस्याङ्गुष्टे लयमुत्तमम् ।

उत्तानशववत्भूमौ शयनं चोक्तमुतमम् ॥२२॥
शिथिलो निर्जने देशे कुर्याच्चेत्सिद्धिमाप्नुयात् ।
एवं च बहु संकेतान् कथयामास शङ्करः ॥२३॥
संकेतैः बहुभिश्चान्यैः यस्य चित्तलयो भवेत् ।
स एव लययोगः स्यात् कर्मयोगं ततः शृणुः ॥२४॥
यमश्च नियमश्चैवासनं च ततः परम् ।
प्राणायामश्चतुथः स्यात् प्रत्याहारस्तु पञ्चमः ।
ततस्तु धारणा प्रोक्ता ध्यानं सप्तममुच्यते ॥२५॥
समाधिः अष्टमः प्रोक्तः सर्वपुण्यप्रदः ।
एवमष्टाङ्गयोगं च याज्ञवल्क्यादयो विदुः ॥२६॥
कपिलाद्यास्तु शिष्याश्च हठं कुयुस्ततो यथा ।
तद्यथा च महामुद्रा महाबन्धस्तथैव च ॥२७॥
ततः स्यात्खेचरीमुद्र बन्धो जालन्धरः तथा ।
उड्डियाणं मूलबन्धो विपरीतकरणी तथा ॥२८॥
वज्रोलिः अमरोलिश्च सहजोलिस्त्रिधा मता ।

एतेषां लक्षणं वक्ष्ये कर्त्ताव्यं च विशेषतः ॥२९॥

यमाः ये दशः संप्रोक्ताः ऋषिभिः तत्त्वदर्शिभिः ।

लघ्वाहारस्तु तेष्वेको मुख्यो भवति नापरे ।

अहिंसा नियमेष्वेका मुख्या भवति नापरे ॥३०॥

चतुरशीतिलक्षेष्वासनेष्वुत्तमं शृणु ।

आदिनाथेन संप्रोक्तं यदासनमिहोच्यते ॥३१॥

उत्तानौ चरणौ कृत्वोरूसंस्थौ प्रयलतः ।

उरू मध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ ॥३२॥

नासाग्रे विन्यसेद्राजद्दन्तमूलं च जिह्वया ।

उत्तभ्य चिबुकं वक्षः संस्थाप्य पवनं शनैः ॥३३॥

यथाशक्ति समाकृष्य पूरयेदुदरं शनैः ।

यथाशक्त्येव पश्चात्तु रेचयेत्पवनं शनैः ॥३४॥

इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनम् ।

दुर्लभं येन केनापि धिमता लभ्यते भुवि ॥३५॥

सांस्कृते शृणु सत्त्वस्थो योगाभ्यासक्रमं यथा ।
वक्ष्यमाणं प्रयत्नेन योगिनां सर्वलक्षणैः ॥३६॥
युव अवस्थोऽपि वृद्धो वा व्याधितो वा शनैः शनैः ।
अभ्यासात्सिद्धिमाप्नोति योगे सर्वोऽप्यतन्द्रितः ॥३७॥
ब्राह्मणः श्रमणो वा बौद्धो वाप्यार्हतोऽथवा ।
कापालिको वा चार्वाकः श्रद्धया सहितः सुधीः ।
योगाभ्यासोऽतो नित्यं सर्वसिद्धिमवाप्नुयात् ॥३८॥
क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत् ।
न शास्त्रपाठमात्रेण काचित्सिद्धिः प्रजायते ॥३९॥
मुण्डितो दण्डधारी वा काषायवसनोऽपि वा ।
नारायणवदो वापि जटिलो मस्मलेपनः ॥४०॥
नमः शिवायवाची वा बाह्यार्चा पूजकोऽपि वा ।
द्वादशस्थानपूजो वा बह्यवत्सलभाषितम् ।

क्रियाहीनोऽथवा कूरः कथं सिद्धिमवाप्नुयात्
॥४१॥

न वेषधारणं सिद्धेः कारणं न च तत्तथा ।

कृपैव कारणं सिद्धेः सत्यमेव तु सांकृते ॥४२॥

शिश्नोदरार्थं योगस्य कथया वेषधारिणः ।

अनुष्ठानविहीनाः तु वङ्चयन्ति जनान् किल
॥४३॥

उच्चावचैः विप्रलंभैः यतन्ते कुशलाः नराः ।

योगिनो वयमित्येवं मूढाः भोगपरायणाः ॥४४॥

शनैर्तथाविधान् ज्ञात्वा योगाभ्यासविवर्जिताम् ।

कृतार्थान्वचनैरेव वर्जयेद्वेषधारिणः ॥४५॥

एते तु विघ्नभूत्तास्ते योगाभ्यासस्य सर्वदा ।

वर्जयेत्तान् प्रयत्नेनेदृशी सिद्ध्दा क्रिया ॥४६॥

प्रथमाभ्यासकाले तु प्रवेशस्तु महामुने ।

आलस्यं प्रथमे विघ्नः द्वितीयस्तु प्रकत्थनम् ।

पूर्वोक्तधूर्त्तगोष्ठी च तृतीयो मन्त्रसाधनम् ॥४७॥
चतुर्थो धातुवादः स्यात्पङ्चमः खाद्यवादकम् ।
एवं च बहवो दृष्टाः मृगतृष्णाः समाः मुनेः ॥४८॥
स्थिरासनस्य जायन्ते तां तु ज्ञात्वा सुधीः त्यजेत् ।
प्राणायामं ततस्कुर्यात्पद्मासनगतः स्वयम् ॥४९॥
सुशोभनं मठं कुर्यात्सूक्ष्मद्वारं तु निर्घुणम् ।
सुष्ठु लिप्तं गोमयेन सुधया वा प्रयत्नतः ॥५०॥
मत्कुणैः मशकैः भूतैः वर्जितं च प्रयत्नतः ।
दिने दिने सुसम्मृष्टं सम्मार्जन्या ह्यतन्द्रितः ।
वासितं च सुगन्धेन धूपितं गुग्गुलादिभिः ॥५१॥
मलमूत्रादिभिः वर्गैऋष्टादशभिरेव च ।
वर्जितं द्वारसम्पन्नम्॥ । ॥५२॥
॥ । वस्त्रं वाजिनमेव वा ।
नान्यत्रस्तरणासीनः परसंसर्गवर्जितः ॥५३॥
तस्मिन् स तु समास्तीर्यासनं विस्तृतांशकम् ।

तत्रोपविश्य मेधावी पद्मासनमन्वितः ॥५४॥
समकायःप्राञ्जलिश्च प्रणम्य स्वेष्टदेवताम् ।
ततो दक्षिणहस्तस्याङ्गुष्ठेनैव पिङ्गलाम् ॥५५॥
निरुध्य पूरयेद्वायुमिड्या च शनैः शनैः ।
यथाशक्तिनिरोधेन ततस्कुर्याच्चु कुम्भकम् ॥५६॥
ततस्त्यजेत्पिङ्गलया शनैः पवनवेगतः ।
पुनः पिङ्गलयापूर्य पूरयेदुदरं शनैः ।
यथा त्यजेत्तथा तेन पूरयेदनिरोधतः ॥५७॥
एवं प्रातः समासीनस्कुर्याद्विंशतिकुम्भकान् ।
कुम्भकः सहितो नाम सर्वग्रहविवर्जितः ॥५८॥
एवं मध्याह्नसमये कुर्यात् विंशतिकुम्भकान् ।
एवं सायं प्रकुर्वीत पुनः विंशतिकुम्भकान् ।
एवमेवार्धरात्रे अपि कुर्यात् विंशतिकुम्भकान् ॥५९॥
कुर्वीत रेचपूराभ्यां सहितान् प्रतिवासरम् ।

सहितो रेचपूराभ्यां तस्मात्सहितकुम्भकः ॥६०॥

कुर्यादेवं चतुर्वारमनालस्यो दिने दिने ।

एवं मासत्रयं कुर्यान्नाडीशुद्धिस्ततो भवेत् ॥६१॥

यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः ।

जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः ॥६२॥

शरीरलघुता दीप्तिः जठराग्निविवर्धनम् ।

कृशत्वं च शरीरस्य तदा जायेत्तु निश्चतम् ॥६३॥

तदा वर्ज्यानि वक्ष्यामि योगविघ्नकराणि तु ।

लवणं सर्षपं चाम्लमुष्णं रूक्षं च तीक्ष्णकम्
॥६४॥

अतीव भोजनम् त्याज्यं स्त्रीसङ्गमनमेव च ।

अग्निसेवा तु सन्त्याज्या धूर्त्तगोष्टिश्च सन्त्यजेत्
॥६५॥

उपायं च प्रवक्ष्यामि क्षिप्रं योगस्य सिद्धये ।

घृतं क्षीरं च मिष्ठान्नं मिताहरश्च शस्यते ॥६६॥

पूर्वोक्तकाले कुर्वीत पवनाभ्यासमेव च ।
ततः परं यथेष्टं तु शक्तिः स्याद्वायुधारणे ।
यथेष्टं धारणाद्वायोः सिद्ध्येत्केवलकुम्भकम् ॥६७॥
केवले कुम्भके सिद्धे रेचपूरकवर्जिते ।
न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते ॥६८॥
प्रस्वेदो जायते पूर्वं मर्दनं तेन कारयेत् ।
ततोऽप्तिधारणाद्वायोः क्रमेणैव शनैः शनैः ॥६९॥
कम्पो भवति देहस्यासनस्थस्य देहिनः ।
ततोऽधिरतराभ्यासाद्दर्दुरी जायते ध्रुवम् ॥७०॥
यथा तु दर्दुरो गच्छेदुत्प्लुत्योत्प्लुत्य भूतले ।
पद्मासनस्थितो योगी तथा गच्छति भूतले ॥७१॥
ततोऽधिकतराभ्यासाद्भूमित्यगश्च जायते ।
पद्मासनस्थ एवासौ भूमिमुत्सृज्य वर्त्तते ॥७२॥
निराधारोऽपि चित्रं हि तदा सामर्थ्यमुद्भवेत् ।
स्वल्पं वा बहु वा भुक्त्वा योगी न व्यथते तदा

॥७३॥

अल्पमूत्रपुरीषश्च स्वल्पनिद्रश्च जायते ।

क्रिमयो दूषिका लाला स्वेदो दुर्गन्धिता तनोः ।

एतानि सर्वदा तस्य न जायन्ते ततः परम् ॥७४॥

ततोऽधिकतराभासाद्बलमुत्पद्यते भृशम् ।

येन भूचरसिद्धिः स्याद्भूचराणां जये क्षमः ॥७५॥

व्याघ्रो लुलायो वन्यो वा गवयो गज एव वा ।

सिंहो वा योगिना तेन म्रियन्ते हस्तताडनात् ।

कन्दर्पस्य यथारूपं तथा तस्यापि योगिनः ॥७६॥

तस्मिन् काले महाविघ्नो योगिनः स्यात्प्रमादतः ।

तद्रूपवशगाः नार्यः कङ्क्षन्ते तस्य सङ्गमम् ॥७७॥

यदि सङ्गं करोत्येष बिन्दुस्तस्य विनश्यति ।

आयुः क्षयो बिन्दुनाशादसामर्थ्यं च जायते ॥७८॥

तस्मात्सर्वप्रयत्नेन बिन्दुराक्ष्यो हि योगिना ।

ततो रहस्युपाविष्टः प्रणवं प्लुतमात्रया ॥७९॥

जपेत्पूर्वाः जितानां च पापानां च नाशहेतवे ।
सर्वविघ्नहरश्चायं प्रणवः सर्वदोषहा ॥८०॥
एवमभ्यासयोगेन सिद्धिः आरम्भसम्भवा ।
ततो भवेद्घटावस्था पवनाभ्यासिनः सदा ॥८१॥
प्राणापानौ मनोवयू जीवत्मपरमात्मनौ ।
अन्योन्यस्याविरोधेनैकतां घटतो कानिचित् ॥८२॥
तदा घटाद्वयावस्था प्रसिद्ध योगिनां स्मृता ।
ततश्चिह्नानि यानि स्युः तानि वक्ष्यामि कानिचित् ॥८३॥
पूर्वं यः कथितोऽभ्यासश्चतुर्धा तं परित्यजेत् ।
दिवा वा यदि वा रात्रौ याममात्रं समभ्यसेत् ॥८४॥
एकबारं प्रतिदिनं कुर्यात्केवलकुम्भकम् ।
प्रत्याहारो हि एवं स्यादेवं कर्तुः हि योगिनः ॥८५॥
इन्द्रियाणीन्द्रियार्थेभ्यो यत्प्रत्याहरति स्फुटम् ।
योगी कुम्भकमास्थाय प्रत्याहारः स उच्यते ॥८६॥

यद्यत्पश्यति चक्षुर्भ्यां तत्तदात्मनि भावयेत् ।
यद्यज्जिघ्रति नासाभ्यां तत्तदात्मनि भावयेत्
॥८७॥
एवं ज्ञानेन्द्रियाणां हि तत्संख्या सन्धरयेत् ।
याममात्रं प्रतिदिनं योगी यत्नादतन्द्रितः ॥८८॥
तदा विचित्रसामर्थ्यं योगिनां जायते ध्रुवम् ।
दूरश्रुतिः दूरदृष्टिः क्षणाद्दूरगमस्तथा ॥८९॥
वाक्सिद्धिः कामचारित्वमदृश्यकरणं तथा ।
मलमूत्रप्रलेपेन लोहादीनां सुवर्णता ।
खेचरत्वं तथान्यत्तु सतताभ्यासयोगिनः ॥९०॥
तदा बुद्धिमता भाव्य योगिना योगसिद्धये ।
एते विहताः महासिद्धेः न रमेत्तेषु बुद्धिमान्
॥९१॥
न दर्शयेच्च कस्मैचित्स्वसामर्थ्य हि सर्वदा ।
कदाचिद्दशयेत्प्रीत्या भक्तियुक्ताय वा पुनः ॥९२॥

यथा मूर्खो यथा मूढो यथा बधिर एव वा ।
तथा वर्तेत लोकेषु स्वसामर्थ्यस्य गुप्तये ॥९३॥
नोचेच्छिष्याः हि बहवो भवन्ति स्व न संशयः ।
तत्कर्मकरणव्यग्रः स्वाभ्यासे विस्मृतो भवेत् ।
अभ्यासेन विहीनस्तु ततो लौकिकतां व्रजेत्
॥९४॥
अविस्मृत्य गुरोः वक्यमभ्यसेत्तदहर्निशम् ।
एवं भवेद्धटावस्था सदाभ्यासस्य योगिनः ॥९५॥
अनभ्यासेन योगस्य वृथा गोष्ठ्या न सिध्यति ।
तस्मात्सर्वप्रयत्नेन योगमेव सदाभ्यसेत् ॥९६॥
ततः परिचयावस्था जयते अभ्यासयोगतः ।
वायुः सम्प्रेरितो यत्नादग्निना सह कुण्डलीम्
॥९७॥
बोधयित्वा सुषुम्नायां प्रविशेदविरोधतः ।
वायुना सह चित्तं तु प्रविशेच्च महापथम् ॥९८॥

महापथं श्मशानं च सुषुम्नापि वेत्यसौ ।
यस्य चित्तं सपवनं सुषुम्नां प्रविशेदिह ॥९९॥
भाव्यानर्थान् सः विज्ञाय योगि रहसि यत्नतः ।
पञ्चधा धारण कुर्यात्तत्तद्भूतभयाफहम् ॥१००॥
पृथिवी धारणं वक्ष्ये पार्थिवेभ्य्प् भयापहम् ।
नाभेः अधः गुदस्योर्ध्वं घटिकाः पञ्च धारयेत्
॥१०१॥
वायुं भवेत् ततो पृथ्वीधारणं तद्भयापहम् ।
पृथिवी सम्भवः तस्य न मृत्युः योगिनो भवेत्
॥१०२॥
नाभिस्थाने ततो वायुं धारयेत् पञ्च नाडिकाः ।
ततो जलाद्भयं नास्ति जलमृत्युः न योगिनः
॥१०३॥
नाभ्युर्ध्वमण्डले वायुं धारयेत्पञ्च नाडिकाः ।
अग्नेयधारणा सेयं न मृत्युः तस्य वह्निना ॥१०४॥
सदा विचित्रसामर्थ्यं योगिनो जायते ध्रुवम् ।

न दह्यते शरीरं च प्रक्षिप्तो वह्नि कुण्डके ॥१०५॥
नाभिभ्रुवोः हि मध्ये तु प्रदेशत्रयसंयुते ।
धारयेत् पञ्च घटिकाः वायुं साषा हि वायवी ।
धारणान्न तु वायोस्तु योगिनो हि भयं भवेत्
॥१०६॥
भ्रूमध्यादुपरिष्टात्तु धारयेत् पञ्च नाडिकाः ।
वायुं योऽसौ प्रयत्नेन सेयमाकाशधारणा ॥१०७॥
आकाशधारणां कुर्वन्मृत्युं जयति तत्त्वतः ।
यत्र तत्र स्थितो वापिसुखमत्यन्तमश्नुते ॥१०८॥
एवं च धारणाः पञ्च कुर्याद्योगी विचक्षणः ।
ततो दृढशरीरः स्यन्मृत्युर्तस्य न विद्यते ॥१०९॥
इत्येवं पञ्चभूतानां धारणां यः समभ्यसेत् ।
ब्रह्मणः प्रलये वापि मृत्युः तस्य न विद्यते ॥११०॥
समभ्यसेत्तदा ध्यानं घटिकाः षष्टिमेव च ।
वायुं निरुध्य ध्यायेत्तु देवतामिष्टदायिनीम् ॥१११॥

सगुणध्यानमेवं स्यादणिमादिगुणप्रदम् ।
निर्गुणं खमिव ध्यात्वा मोक्षमार्गं प्रपद्यते ॥११२॥
निर्गुणध्यानसम्पन्नः समाधिं च ततोऽभ्यसेत् ।
दिनद्वादशकेनैव समाधिं समवाप्नुयात् ॥११३॥
वायुं निरुध्य मेधवी जीवन्मुक्तो भवेद्ध्रुवम् ।
समाधिः समतावस्था जीवात्मपरमात्मनोः
॥११४॥
यदि स्याद्देहमुत्स्रष्टुमिच्छा चेदुत्सृजेत्स्वयम् ।
परब्रह्मणि लीयेत्त्यक्त्वा कर्मशुभाशुभम् ॥११५॥
अथ चेन्नो समुत्स्रष्टुं स्वशरीरं यदि प्रियम् ।
सर्व लोकेषु विचरेदणिमादिगुणान्वितः ॥११६॥
कदाचित्स्वेच्छया देवो भूत्वा स्वर्गयपि संचरेत् ।
मनुष्यो वापि यक्षो वा स्वेच्छया हि क्षणाद्भवेत्
॥११७॥
सिंहो व्याघ्रो गजो वा स्यादिच्छया जन्तुतां व्रजेत् ।

यथेष्टमेव वर्त्तेत योगी विद्वान्महेश्वरः ॥११८॥

कविमार्गोऽयमुक्तः ते सांकृते अष्टाङ्गयोगतः ।

सिद्धानां कपिलादीनां मतं वक्ष्ये ततः परम्
॥११९॥

अभासभेदतो भेदः फल तु सममेव हि ।

महामुद्रां प्रवक्ष्यामि भैरवेणोक्तमादरात् ॥१२०॥

पार्ष्णिवामस्य पादस्य योनिस्थाने नियोजयेत् ।

प्रसार्य दक्षिणं पादं हस्ताभ्यां धारयेद्दृढम् ॥१२१॥

चिबुकं हृदि विन्यस्य पूरयेत् वायुना पुनः ।

कुम्भकेन यथाशक्त्या धारयित्वा तु रेचयेत् ।

वामाङ्गेन समभ्यस्य दक्षिणाङ्गेन चाभ्यसेत्
॥१२२॥

प्रसारितस्तु यः पादस्तमुरूपरि विन्यसेत् ।

अयमेव महाबन्धो मुद्रावच्चामुमभ्यसेत् ॥१२३॥

महाबन्धस्थितो योगी स्फिचौ सन्ताडयेच्छनैः ।

अयमेव महाबन्धः सिद्धैः अभ्यस्यते नरैः ॥१२४॥
अन्तः कपालकुहरे जिह्वां व्यावर्त्य बन्धयेत् ।
भ्रूमध्ये दृष्टिः अप्येषा मुद्रा भवति खेचरी ॥१२५॥
कण्ठमाकुञ्च्य हृदये स्थापयेद्दृढमिच्छया ।
जलन्धरो बन्ध एष अमृतद्रवपालकः ॥१२६॥
नाभिस्थोऽग्निः कपालस्थसहस्रकमलच्युतम् ।
अमृतं सर्वदा तावदन्तर्ज्वलति देहिनाम् ॥१२७॥
यथा चाग्निस्तदमृतं न पिबेत्तु पिबेत्स्वयम् ।
याति पश्चिममार्गेणैवमभ्यासतः सदा ।
अमृतं कुरुते देहं जलन्धरमतोऽभ्यसेत् ॥१२८॥
उड्याणं तु सहजं गुणौघात्कथितं सदा ।
अभ्यसेदस्ततन्द्रस्तु वृद्धोऽपि तरुणो भवेत्
॥१२९॥
नाभेः ऊर्ध्वमधश्चापि तानं कुर्यात्प्रयत्नतः ।
षण्मासमभ्यसेन्मृत्युं जयेदेव न संशयः ॥१३०॥

मूलबन्धं तु यो नित्यमभ्यसेत्स च योगवित् ।
गुदे पार्ष्णिं तु सम्पीड्य वायुमाकुञ्चयेद्बलात् ।
वारं वारं यथा चोर्ध्वं समायाति समीरणः ॥१३१॥
प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् ।
गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः
॥१३२॥
करणं विपरिताख्यं सर्वव्याधिविनाशनम् ।
नित्यमभ्यासयुक्तस्य जठराग्निः विवर्द्धते ॥१३३॥
आहारो बहुलः तस्य सम्पाद्यः सांकृते ध्रुवम् ।
अल्पाहारो यदि भवेदग्निः दाहं करोति वै ।
ऊर्ध्वं भानुरधश्चन्द्रस्तद्यथा शृणु सांकृते ॥१३४॥
अधः शिरश्चोर्ध्वपादः क्षणं स्यात्प्रथमे दिने ।
क्षणात्तु किंचिदधिकमभ्यसेन दिने दिने ॥१३५॥
वलिश्च पलितश्चैव षण्मासोर्ध्वं न दृश्यते ।
याममात्रं तु यो नित्यमभ्यसेत्स तु ओगवित्

॥१३६॥

वज्रोलिं कथयिष्यामि गोपितं सर्वयोगिभिः ।
अतीवैतद्रहस्यं तु न देयं यस्य कस्यचित् ।
स्वप्राणैस्तु समो यो स्यात्तसमै च कथयेद्ध्रुवम्
॥१३७॥

स्वेच्छया वर्त्तमानोऽपि योगोक्तनियमैः विना ।
वज्रोलिं यो विजानति स योगी सिद्धिभाजनः
॥१३८॥

तत्र वस्तु द्वयं वक्ष्ये दुर्लभं येन केनचित् ।
लभ्यते यदि तस्यैव योगसिद्धिकरं स्मृतम् ॥१३९॥
क्षीरमाङ्गिरसं चेति द्वयोराद्यं तु लभते ।
द्वितीयं दुर्लभं पुंसां स्त्रीभ्यः साध्यमुपायतः ।
योगाभ्यासरता स्त्री च पुंसा यत्नेन साधयेत्
॥१४०॥

पुमान् स्त्री वा यदन्योन्यं स्त्रीपुंस्त्वानपेक्षया ।
स्वप्रयोजनमात्रैकसाधनात्सिद्धिमाप्नुयात् ॥१४१॥

चलितो यदि बिन्दुः तमुर्ध्वमाकृष्य रक्षयेत् ।
एवं च रक्षितो बिन्दुः मृतुं जयति तत्त्वतः ॥१४२॥
मरणं बिन्दुपातेन जीवनं बिन्दुधारणत् ।
बिन्दुरक्षाप्रसादेन सर्वं सिध्यति योगिनः ॥१४३॥
अमरोलिस्तद्यथा स्यात्सहजोलिस्ततो यथा ।
तदभ्यासक्रमः शस्यः सिद्धानां संप्रदायतः
॥१४४॥
एतैः सैः वैस्तु कथितैरभ्यसेत् काललालतः ।
ततो भवेद्राजयोगो नान्तरा भवति ध्रुवम् ।
न दिङ्मात्रेण सिद्धिः स्यादभ्यसेनैव जायते
॥१४५॥
राजयोगं वरं प्राण्य सर्वसत्त्ववशंकरम् ।
सर्वं कुर्यान्नवा कुर्याद्यथारुचिविचोष्टितम् ॥१४६॥
यथान्तरा च योगेन निष्पन्ना योगिनः क्रिया ।
यथावस्था हि निष्पत्तिर्भुक्तिमुक्तिफलप्रदा
॥१४७॥

सर्वं ते कथितं ब्रह्मन् सांस्कृते योगमाचर ।
इति तस्य वचः श्रुत्वा सांस्कृतिः योगमाप्तवान् ।
सर्वासिद्धीरवाप्यासौ दत्तात्रेयप्रसादतः ॥१४८॥
य इदं पठते नित्यं साधुभ्यः श्रावयेदपि ।
तस्य योगः क्रमेणैव सिध्यत्येव न संशयः ॥१४९॥
योगिनोऽभ्यासयुक्ताः ये ह्यरण्येषु गृहेषु वा ।
बहुकालं रमन्ते स्म बहुकालविवर्जिताः ॥१५०॥
तस्मात्सर्वप्रयत्नेन योगमेव सदाभ्यसेत् ।
योगाभ्यासो जन्मफलं विफला हि तथा क्रिया ॥१५१॥
महामायाप्रसादेन सर्वेषामस्तु तत्सुखम् ।
एतत्सर्वं यथायुक्तं तामेवाराधयेत्ततः ॥१५२॥
यः संस्मृत्या मुनीनामपि दुरितहरो योगसिद्धिप्रदश्च ।
कारूण्याद्यः प्रवक्ता सुखदुःखसुहृद्योगशास्त्रस्य नाथः ॥१५३॥

तस्याहं भक्तिशुन्योऽप्यखिलजनगुरोः भक्तिचिन्तामणेः हि ।
दत्तत्रेयस्य विष्णोः पदनलिनयुगं नित्यमेव प्रपद्ये ॥१५४॥

*****************************

कार्तवीर्यकृत दत्तात्रेयस्तोत्रम्

कार्तवीर्य उवाच -

यस्मिन्निदं जगदशेषमसत्स्वरूपं

स्वप्नाभमस्तधिषणं पुरदुःख दुःखम् ।

त्वय्येव नित्य सुख बोधतनावनंते

मायात उद्यदपि यत्सदिवावभाति ॥१॥

यस्मिन्विभाति सकलं मनसो विलासं

दृष्टं विनिष्टमतिलोलमलातचक्रम् ।

विज्ञान मेकमुरुधैव विभाति माया -

स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥२॥

एतद्विमृश्य मुनयो मनसस्त्र्यवस्था -

त्वन्माययात्मनिकृता इति निश्चितार्थाः ।

संच्छिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना -

खिल गुरं शरणं प्रपन्नाः ॥३॥

तं त्वामहं शरणदं सचिवं बिलेऽस्मिन्

विज्ञानदं स्वजन दुःख हरं त्र्यधीशम् ।

गोविंद मच्युतमजं शिवदं मुमुक्षुः

सर्वात्मना खिल गुरुं प्रणतः परेशम् ॥४॥

तन्नित्यमुक्तपरिशुद्ध विबुद्धमीशं

सर्वस्यदेवमवितारमनन्यसिद्धम् ।

देहेंन्द्रियासुविषयैः परिभुक्तरूपः

सर्वात्मना शरणदं शरणं प्रपन्नः ॥५॥

यस्मिन्निदं प्रोत मशेषमोतं

पटोयथा तंतुवितानसंस्थः ।

तं सच्चिदानंदमहं पुराणं
नारायणं नरवरं शरणं प्रपद्ये ॥६॥
दष्टं जनं संपतितं बिलेऽस्मिन्
कालाहिना क्षुद्रसुखोरुतर्षम् ।
समुद्धरैनं कृपया पवर्गै
र्वचो भिरासिंच महानुभाव ॥७॥
तवेहितं कोर्हति साधु वेदितुं
स्वमाययेदं सृजतो नियच्छतः ।
यन्मायया विश्वसृजः परेशम्
विमोहिता ये किमु कर्मबद्धाः ॥८॥
तापत्रयेणाभिहतस्य घोरे
संतप्यमानस्य भवाध्वनीश ।
पश्यामि नान्यच्छरणं तवांघ्रि -
द्वंद्वातपत्रादमृताभिवर्षात् ॥९॥
ज्ञानं विशुद्धं विपुलं यथैत

द्वैराग्य विज्ञान युतं पुराणम् ।
आख्याहि विश्वेश्वरविश्वमूर्ते
त्वद्भक्तियोगं च महद्विमृग्यम् ॥१०॥
तवाव तारोऽय मकुंठ धामन्
धर्मोपदेशायच योग गुप्त्यै ।
मुमुक्षु वर्गस्य विधातुमीश
ज्ञानस्वरूपं विभवाय तेषाम् ॥११॥
जीवस्य यत्संसरतो विमोक्षणं
न ज्ञानतोऽनर्थवहाच्छरीरतः ।
लीलावतारैस्तनुभिः समीहसे
यथां जसा दुस्तरमुत्तरेज्जनः ॥१२॥
तं त्वां वयं जडधियो न विदाम भूमन्
कूटस्थामादि पुरुषं जगतामधीशम् ।
यत्सत्वतः सुरगणा रजसः प्रजेशा
भूतादयश्च तमसः सभवान् गुणेशः ॥१३॥

कामं तनोषि विभवं भजतामधीश
मन्ये तथा न वितनोषि पदं निजं यत् ।
त्वत्पादुके अविरतं प्रणता विभून्म -
तेषां तदेव भगवन्न च नश्वरं यत् ॥१४॥
किमेनया खलु विभो विविध प्रसूत्या
भूम्या तथा सुतकलत्र गजाश्वभृत्यैः ।
राजेन किं मम सुरेश समस्त कामैः
योहं न वेद्मि निजरूप मिदं त्वदीयम् ॥१५॥
सत्यं विभाति सकलं मनसाथ बुध्या
द्वैतं मृषाभ्रममिति प्रवदन्ति सिद्धाः ।
मायामयं तदिदमाशु कथं विभातं
सम्यकं प्रशाधि शरणं भगवन् प्रपन्नम् ॥१६॥
नाहं बिभेन्यजितशत्रुभिरूर्जितैर्वा
मृत्योर्नचेश शिखिनो न जलान्न वायोः ।
नैवोद्विजेमि विकटाद्यमराज दंडा -

त्संसार चक्रग्रसनाद्धि यथा बिभेमि ॥१७॥

तस्मात्तवांघ्रि कमले मम मौलि रीश

भृंगायते निजसुखे रमितं मनो मे ।

औत्कंठ्यबाष्पकलया मुमुरर्द्यमानं

त्वय्येव देव रमते विभवं विसृज्य ॥१८॥

विस्फार्य विश्वविजयाय दृशौ महेश

तप्तं शुचा त्रिगुणया शमयात्मसूक्तैः ।

देव त्वदंघ्रिकमलाद्धिसुखा मनुष्या

स्तेषां विभोऽयमुचितो विषयैः प्रसंगः ॥१९॥

सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेधसम्

विश्वात्मानमजंब्रह्मान्प्रणतोऽस्मि परं पदम् ॥२०॥

योगरंधित कर्माणो हृदियोग विभाविते ।

योगिनो यं प्रपश्यंति योगीशं तं नतोस्म्यहम् ॥२१॥

निर्विण्णो नितरां ब्रह्मन्नसदिंद्रिय तर्पणात् ।

तर्पणादेवम परं निमग्नोवृजिनार्णवे ॥२२॥

अलमेतावता भूमन् विषयासक्त चेतसा ।
यौवनाद्बहु तिथिर्यातो नाद्यापि वितृषं मनः ॥२३॥
सत्संगेन हि दैतेया यातुधानाः खगा मृगाः ।
निस्तीर्णा मनुजा देव दुस्तरं भवसागरम् ॥२४॥
दुर्भगो बत लोकेहं नितरां क्षत्रियाधमः ।
निषेव्य चरणांभोजं न मुमुक्षे च बंधनात् ॥२५॥
मिथ्या विलासितेष्वेषु लंपटः सन्सदा विभो ।
सुसाम्राज्यश्रिया मत्तो नांतकं बुबुधे परम् ॥२६॥
इदानीं त्वत्प्रसादेन ह्यनु तप्तोस्मि केवलम् ।
न कथंचिल्लभे शांतिं विना ते वचनामृतम् ॥२७॥
न पारमेष्ठ्यं न महेंद्रधिष्ण्यं
न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धिरमरार्थिता विभो
सुखाय मे सर्व मिदं त्वदाप्तम् ॥२८॥
तस्मात प्रप्न्नार्तिहराद्य हार्दं

मायामयं वासनया विरूढम् ।
सदुक्ति तीक्ष्णासिना विवृक्तुमीश
विकधत्स्वमूलं विविधायमस्य ॥२९॥
विशुद्धविज्ञानघनं स्वसंस्थया
समाप्त सर्वार्थममोघवांछितम् ।
लीलागृहीतामल रुक्मदेहं
वंदे सदानंद वपुः पुराणम् ॥३०॥
तवावतारोयमकुंठ धामन्
माया विमूढान्विमुखानघेन ।
पादारविंदादरविंदनाभे
विभो समुद्धर्तुमपीश विद्मः ॥३१॥
त्वदीयपादाब्जरसाधिरूढ
मनोलिनो ये भवदीयमुख्याः ।
कुतः पुनस्तेषु भवामयोयं
विभो विधातुं वृजिनं विभुः स्यात् ॥३२॥

पुरात्रिणा देव तपः सुतप्तं

त्वदाप्तिकामेन समान शीलया ।

प्रस्वा तवानंतवरप्रदस्त्वं

दत्तो मयाहं भगवान् स दत्तः ॥३३॥

न तेऽस्ति देहो न तवेश वर्णो

न नामरूपे न च तेस्तिकर्म ।

उद्धर्तुकामेन भवांबुधेर्जनं

लीलावपुस्त्वं प्रकटी कृत्तं ते ॥३४॥

निजपदाब्जदलाविशन्मतिं
विकसिताब्जदलैर्नयनाब्जैः ।

विकसिताब्जसुखं हृषितांगं परम करुणिकेश

विधत्स्व माम् ॥३५॥

नान्यदस्तिशरणं ममलोके तव सुसेव्यचरणाद्धि
दयालो ।

मग्नमुद्धरभवांबुधेर्विभो तव पदाब्जरतं
निजभक्तम् ॥३६॥

नमस्ते पुंडरीकाक्ष नमस्ते पुरुषोत्तम ।

नमस्ते विश्ववंद्यांघ्रे नमस्ते योगिनांवर ॥३७॥

नमस्ते वासुदेवाय नमः संकर्षणाय च ।

प्रद्युम्नायानिरुद्धाय योगिवंद्याय ते नमः ॥३८॥

नमस्ते पद्मनाभाय नमस्ते जलशायिने ।

नमस्तेस्तु हृषीकेश पाहि मां वृजिनार्णवात् ॥३९॥

नमोनंताय सूक्ष्माय सर्वाध्यक्षाय साक्षिणे ।

तमो गिरां विदूराय भक्तावासाय ते नमः ॥४०॥

नमः पंकज नाभाय नमः पंकजमालिने ।

नमः पंकज नेत्राय नमस्ते पंकजांघ्रये ॥४१॥

प्रसीद परमानंद प्रसीद परमेश्वर ।

आधिव्याधिभुजंगेन दष्टंमामुद्धर प्रभो ॥४२॥

॥ इति श्रीब्रह्मांडपुराणे कार्तवीर्यकृत
दत्तात्रेयस्तोत्रं संपूर्णम् ॥

*************************

अथ दत्तमाला प्रारभ्यते

श्रीगणेशाय नमः ॥

पार्वत्युवाच -

मालामंत्र मम ब्रूहि प्रिया यस्मादहं तव ॥

ईश्वर उवाच -

श्रृणु देवि प्रवक्ष्यामि मालामंत्रमनुत्तमम् ॥ ॐ नमो भगवते दत्तात्रेयाय, स्मरणमात्रसंतुष्टाय, महाभयनिवारणाय, महाज्ञानप्रदाय, चिदानंदात्मने, बालोन्मत्तपिशाचवेषाय, महायोगिने, अवधूताय, अनधाय, आनंदवर्धनाय, अत्रिपुत्राय, सर्वकामप्रदाय, ॐ भवबन्ध मोचनाय, आं साध्यबन्धनाय, ह्रीं सर्वभूतिदाय, क्रों साध्याकर्षणाय, ऐं वाक्प्रदाय, क्लीं जगत्रयवशीकरणाय, सौं सर्वमनोक्षोभणाय, श्रींमहासंपत्प्रदाय, ग्लौ भूमण्डलाधिपत्यप्रदाय,

द्रां चिरंजीविने, वषट् वशीकुरु कुरु, वौषडाकर्षयाकर्षय, हुं विद्वंषय विद्वेषय. फट उच्चाटयोच्चाटय, ठठ स्तंभय स्तंभय, खें खें मारय मारय, नमः संपन्नय संपन्नय, स्वाहा पोषय पोषय, परमंत्र - परयंत्र - परतंत्राणि छिंधि छिंधि, ग्रहान्निवारय, निवारय व्याधीन विनाशय विनाशय, दुःखं हरहर, दारिद्र्यं विद्रावय विद्रावय, देहं पोषय पोषय, चित्तं तोषय तोषय सर्वमंत्रस्वरूपाय, सर्वयंत्रस्वरूपाय, सर्वतंत्रस्वरूपाय, सर्वपल्लवस्वरूपाय; ॐ नमो महासिद्धिदाय स्वाहा ॥ चतुःषतजपात्सिद्धिः ॥

॥ इति श्रीवड्डोमरेश्वरविरचित्ता दत्तमाला समाप्ताः ॥

***************************

अथ दत्तकवचः प्रारभ्यते

श्रीगणेशाय नमः ॥

अस्य श्रीदत्तात्रेयकवचस्तोत्रमहामन्त्रस्य,
आंगिरसो भगवान् ऋषिः अनुष्टुप् छंदः
श्रीदत्तात्रेयः परमात्मा देवता, ऐं बीजं क्लीं शक्तीः
त्वाहा किलकम्, मम श्रीदत्तात्रेयप्रसादसिध्यर्थे
जपे विनियोगः ॥

अथ ध्यानम् -

ध्यायेत्संयमिसेवितांघ्रिकमलं तत्तत्प्रकाशोज्वलं
मायागूढविहारिणं ( भुवि ) यदि सदा
माहिष्मतीपावनम् ॥ रेवातीरविहारिणं यतिवरं ॥
भक्तार्तिनिर्वाहकम् ॥ योगारूमतिं प्रसन्नवदनं
योगीश्वरीशं भजे ॥१॥

पूर्वस्यां दिशि योगीशः आग्नेय्यां दिशि माधवः ॥
दक्षिणे पातु सर्वात्मा नैऋत्यां भक्तवत्सलः ॥२॥

प्रतीच्या पातु ब्रह्मण्यो वायव्यां च दिगंबरः ॥
उदीच्यां सुव्रतः पातु इशान्ये पातु भद्रदः ॥३॥

अधस्ताद्विष्णुभक्तस्तु सर्वतः पातु सर्वगः ॥
दत्तात्रेयः शिरः पातु ललाटं मौनिशेखरः ॥४॥

भ्रुमध्यं पातु सर्वज्ञो नेत्रे पातु दयानिधिः ॥ नासां पातु महायोगी श्रुतिं पातु श्रुतिप्रियः ॥५॥

स्कंधो मनोजवः पातु पार्श्वे च पुरुषोत्तमः ॥ करयुग्मं च मे पातु कार्तवीर्यवरप्रदः ॥६॥

नखान्पात्वघसंहारी कुक्ष्यौ पातु भयापहः ॥ नारायणात्मकः पातु वक्षसी स्तनयोस्तथा ॥७॥

पृष्ठतः सर्वदा पातु सर्वलोक नियामकः ॥ उदरं चाच्युतः पातु नाभिं पातु महात्मकः ॥८॥

अत्रिपुत्रः कटिं पातु सक्थिनीं पातु शाश्वत ॥ गुह्यं च मे सदा पातु नग्नवेषधरः परः ॥९॥

ऊरू पातु त्रिकालज्ञो जानुनीं पातु शंकरः ॥ जंघे मायाजितः पातु पातु गुल्फी स्वयं प्रभुः ॥१०॥

पादौ पातु सदाभोगी सदायोगी सदायोगी करांगुलिः ॥ त्रिकालज्ञोऽखिल वपुः पातु रोमाणि सर्वगः ॥११॥

ॐ नमो भगवते दत्तात्रेयाय, सर्वलोकैक सन्नुताय, सर्वनियामकाय, सर्वतंत्राय, सर्वकामफलप्रदाय,

सर्वविद्यांपारंगताय, सर्वयोगींद्रमुनींद्रसेविताय, सर्वभक्तलोकरक्षणाय, सदा ब्रह्मचर्यव्रतधराय, मायागूढविहाराय, जडोन्मत्त - मुक - बधिरस्वरूपाय; नग्नवेषसंचाराय ॥

ॐ नमो भगवते दत्तात्रेयाय, मुनिपतये, सर्वदेवाभयप्रदाय, सर्वराक्षसविनाश कारणाय, सर्वोपद्रवनिवारणाय, सर्वमंत्र - यंत्र तंत्रनिवारणाय, सर्व ग्रहोच्चाटनाय, सर्वरोगविनाशनाय ॐ ह्रीं क्रों क्षौं क्रूं ह्रीं हूं श्रीं ॥

ॐ नमो भगवतेर कार्तवीर्यसमुद्धरणाय, रेवानदीजलक्रीडापरायणाय, माहिष्मतीपुरनिवासाय, अनसूयागर्भसंभूताय, अत्रिनेत्रानंदकराय, क्षणमात्रलोकसंचरणाय, शम - दम - यम - नियमसंपन्नाय, ब्रह्मराक्षस - भूत - वेताळ - पैशाचिक - शाकिनी - डाकिनी - पूतनादिग्रहनिवारणाय, आश्रितार्तिनिवारणाय, संस्मरणमात्रसंन्निहिताय, श्रीदत्तात्रेयाय,

योगीश्वराय, सर्वकार्याणि मे साधय साधय, सर्वदा रक्ष रक्ष, हुंफट् स्वाहा ॥ दत्तात्रेय कवचं य इदं श्रृणुयान्नरः लिखेवा धारयेद्यस्तु पठेद्वा नियतः पुमान् ॥१॥

सर्वान्कामानवाप्नोति सर्वत्र विजयी भवेत् ॥
राजद्वारे महाघोरे संग्रामे देशविप्लवे ॥२॥

नदीसंक्रमणे चैव तथा चोराग्निसंकटे ॥ गज - सिंह - व्याघ्र - शालावृक - भीममहोरगैः ॥३॥

अरण्ये दस्युसंकीर्णे पर्वते दुर्गमे तथा ॥ ब्रह्मराक्षस - गंधर्व - भूत - यक्ष - ग्रहादिकैः ॥४॥

शाकिनी डाकिनी या तु प्रेतेभ्यो नभयं भवेत् ॥
अपुत्रो लभते पुत्रान् निर्देहनो धनवान् भवेत् ॥५॥

विद्यार्थी चाप्नुयाद्विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥
रोगी च मुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥६॥

अपस्मार - क्षय - व्याधि - स्फोटिकान्विकलास्तथा ॥ एकाहिकम् व्द्याहिकं च त्र्याहिकं च चतुर्थकम् ॥७॥

पाक्षिकं मासिकं चैव ज्वरमस्तिगतं तथा ॥
शीतोष्णतापज्वरो वा दूरादेव विनश्यति ॥८॥

सद्यः सारस्वतप्राप्तिं विवादे विजयप्रदम् ॥
सर्वग्रहानुग्रहभाक् सर्वसंपत्प्रदायकम् ॥९॥

दत्तात्रेयप्रसादेन सर्वान्कामानवाप्नुयात् ॥१०॥

॥ इति श्रीब्रह्मवैवर्तपुराणे श्रीदत्तकवचं संपूर्णम् ॥

****************************

अथ श्रीदत्तहृदय प्रारंभः

श्रीगणेशाय नमः ॥

श्रीपार्वत्युवाच -

देव शंकर सर्वेश भक्तानामभयप्रद ॥ विज्ञप्तिं
श्रृणु मे शंभो नराणां हितकारणम् ॥१॥

ईश्वर उवाच -

वद प्रिये महाभागे भक्तानुग्रहकारिणी ॥२॥

पार्वत्युवाच -

देवदेवस्य दत्तस्य हृदयं ब्रूहि मे प्रभो ॥ सर्वारिष्टहरं पुण्यं जनानां मुक्तिमार्गदम् ॥३॥

ईश्वर उवाच -

श्रृणु देवि महाभागे हृदयं परमाद्भुतम् ॥४॥

अस्य श्रीदत्तात्रेयत्दृदयस्तोत्रमंत्रस्य श्रीभगवान् ईश्वरो ऋषिः, अनुष्टुप् छंदः, श्रीचित्स्वरूपी दत्तात्रेयो देवता, ॐबीजं, र्हींशक्तिः, क्रौंकीलकम, ममाभीष्टसिध्यर्थें जपे विनियोगः द्रामिती दीर्घंषडंगन्यासः ॥ध्यानम्॥

बालचंद्रसुशुमे च किरीटे पुष्पहारमणियुक्तवक्षकम् ॥ पीतवस्त्रपरिशोभितमध्यं प्रणमाम्य - मुसुयोद्भवदत्तम् ॥१॥

दत्तं सनातनं नित्यं निर्विकल्पम् निरामयम् ॥ हरिं शिवं महादेवं सर्वभूतोपकारम् ॥२॥

नारायणं महाविष्णुं सर्ग - स्थित्यंत कारिणम् ॥ निराकारं च सर्वेशं कार्तवीर्य वरप्रदं ॥३॥

अत्रिपुत्रं महातेज मुनिवद्यं जनार्दनं ॥ द्रांबीजं वरदं शुद्धं ह्रींबीजेमसमन्वितम् ॥४॥

शरण्यं शाश्वतं युक्तं मायया च गुणान्वितम् ॥ त्रिगुणं त्रिगुणातितं त्रियामापतिमौलिकम् ॥५॥

राम रमापति कृष्णं गोविंदं पीतवाससम् ॥ दिगंबरं नागहारं व्याघ्रचर्मोत्तरीयकम् ॥६॥

भस्मगंधादिलिप्तांगं मायामुक्तं जगत्पतिम् ॥निर्गुणं च गुणोपेतं विश्वव्यापिनमीश्वरम् ॥७॥

ध्यात्वा देवं महात्मानं विश्ववंद्य प्रभुं गुरुम् ॥ किरीटकुंडलाभ्यां च युक्तं राजीवलोचनम् ॥८॥

चद्रानुजं चंद्रवक्त्रं रुद्रं इंद्रादिवंदितम् ॥ अनुसूयाकलत्रं च दिनेशममराधिपम् ॥९॥

योगीशं देवदेवेश अब्जजन्मादिवंदित ॥ नारायण विरूपाक्ष दत्तात्रेय नमोस्तु ते ॥१०॥

अनंत कमलाकांत औदुंबरस्थित प्रभो ॥ निरंजन महायोगिन् दत्तात्रेय नमोस्तु ते ॥११॥

महाबाहो मुनिमणे सर्वविद्याविशारद ॥ स्थावरं

जंगमानां च दत्तात्रेय नमोस्तु ते ॥१२॥

ऐंद्र्यां त्रातु महावीर्यो वन्ह्यां प्रणवपूर्वकम् ॥ याम्यां दत्तात्रेयो रक्षेन्नैरृत्यां भक्तवत्सलः ॥१३॥

प्रतीच्या पातु योगीशो योगिनां हृदये स्थितः ॥ आनिल्यां वरदः शंभुः कौबेर्यां जगतः प्रभुः ॥१४॥

एकाक्षरो महामंत्रः सर्वमंत्रेषु विश्रुतः ॥ अष्टाक्षरः सर्वसिद्धिः सर्वतंत्रेषु गोपितः ॥१५॥

ईशान्यां पातु मे रामो उर्ध्वं पातु महामुनिः षडक्षरो महामंत्रः पात्वधस्ताज्जगप्तिता ॥१६॥

एवं पंक्तिदहो रक्षेद्यदुराजवरप्रदः ॥ अकारादिक्षकारांतं सदा रक्षेद्विभुः स्वयम् ॥१७॥

आदिनाथस्य दत्तस्य हृदयं सर्वकामदं ॥ दत्तं दत्तं पुनर्दत्तं योवदेद्भक्तिसंयुतः ॥१८॥

तस्य पापानि सर्वाणि क्षयं यांति न संशयः ॥ य इदं पठते नित्यं हृदयं सर्वकामदम् ॥१९॥

पिशाच - शाकिनी - भूता - डाकिनी शाकिनी तथा ॥ ब्रह्मराक्षसवेताला झोटिंगा बालभूतकाः ॥२०॥

गच्छंति पठनाद्देवि नात्र कार्या विचारणा ॥
अपवर्ग प्रदं साक्षात् मनोरथप्रपूरकम् ॥२१॥

एकवारं द्विवारं च त्रिवारं च पठेन्नरः ॥ जन्ममृत्यु च दुःख च सुखं प्राप्नोति भक्तिमान् ॥२२॥

गोपनीयं प्रयत्नेन जननीजारवत्प्रिये ॥ नदेयं दुर्हृदे स्तोत्रं हृदयाख्यं च भामिनि ॥२३॥

गुरुभक्ताय दातव्यं अन्यथा नप्रकाशयेत् ॥ तव स्नेहाच्च कथितं भक्तिं ज्ञात्वा मया शुभे ॥२४॥

दत्तात्रेयस्य कृपया सभवेद्दीर्घमायुकः ॥२५॥

॥ इति श्रीरुद्रयामले शिवपार्वतीसंवादे दत्तहृदयस्तोत्रं संपूर्णम् ॥

************************

अथ दत्तपंजरः प्रारभ्यते

श्रीदत्तात्रेयाय नमः ॥

अथ पंजरः ॥ ह्रींमित्यादिषडंगः ॥ लमिति जपं ॥

पूजा ॥ मूलमंत्र ॥ ॐ नमो भगवते दत्तात्रेयाय, महागंभीराय, वैकुंठवासाय, शंख - चक्र - गदा - त्रिशूलधारिणे, वेणुनादाय, दुष्टसंहारकाय, शिष्टपरिपालकाय, नारायणास्त्रधारिणे, चिद्रूपाय, प्रज्ञानंब्रह्ममहावाक्याय, सकलकर्मनिर्मिताय, सच्चिदानंदाय, सकललोकसंचारणाय, सकलदेवतावशीकरणाय, सकललोकवशीकरणाय, सकलराजजनवशीकरणाय, सकलभोगवशीकरणाय, लक्ष्मीऐश्वर्यसंपत्कराय, मम मातृ - पितृ - सति - सहोदर - पुत्र - पौत्राभिवृद्धिकराय, गुडोदककलशपूजाय, अष्टदळपद्मपीठाय, बिंदुमध्ये लक्ष्मीनिवासाय, ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ अष्टदळबंधनाय, ह्रीं ह्रीं ह्रीं ह्रीं चतुष्कोणबंधनाय, ह्रां ह्रां ह्रां ह्रां चतुर्द्वारबंधनाय, ऋग्यजुःसामाथर्वण - प्रणवसमेताय, उदात्तानुदात्तस्वरितप्रचयाय, गायत्री - सावित्री - सरखतिदेवताय,

अवधूताश्रमाय, आजपागायत्रीसमेताय, सकलसंपत्कराय, परमंत्र परतंत्र - परतंत्रउच्चाटनाय, आत्ममंत्र - आत्मयंत्र - आत्मतंत्र संरक्षणाय, सदोचित - सकलमतस्थापिताय, सद्गुरुदत्तात्रेयाय, हुंफट् स्वाहा ॥ ॐ तत्सत् ॥

**********************

अथ दत्तषट्चक्रस्तोत्रम्

श्रीगणेशाय नमः ॥

मूलाधारे वारिजपत्रे सचतुष्के वं शं षं सं वर्णविशालैः सुविशालैः ॥ रक्तवर्णं श्रीगणनाथ भगवतं दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोस्मि ॥१॥

स्वाधिष्ठाने षड्दळपत्रे तनुलिंगे बालां तावद्वर्णविशालैः सुविशालैः ॥ पीतवर्णं वाक्पतिरूपं ग्रहणांतं दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोस्मि ॥२॥

नामीपत्रे पद्मदशांते उफ वर्णे लक्ष्मीकांतं गरुडारूढं नरवीरम् ॥ नीलं वर्णं निर्गुणरूपं निगमाख्यं दत्तात्रेयं श्रीगुरुमूर्ति प्रणतोस्मि ॥३॥

हृत्पद्मांते द्वादशपत्रे कठवर्णे शंभु शेषं हंसविशेषं समयं तम् ॥ सर्ग - स्थित्यतान्कुर्वंतं शिवकांतिं दत्तात्रेयं श्रीगुरुमूर्ति प्रणतोस्मि ॥४॥

चक्रस्थाने चक्रविशुद्धे कुसुमांते चंद्राकारे षोडशपत्रे स्वरवर्णे ॥ मायाशीशं जीवशिवं तं निजमूर्तिं दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोस्मि ॥५॥

आज्ञाचक्रे भृकुटिस्थाने द्विदळांते हंक्षं बीजं ज्ञानिधिं तं गुरुमूर्तिं ॥ विद्युद्वर्णं ज्ञानमयं तं निटिलाक्षं दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोस्मि ॥६॥

शांताकारं शेषशयनं सुरवंद्यं कांतानाथं कोमलगायं कमलाक्षम् ॥ चिंतारत्नं चिद्धनरूपं द्विजराज दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोस्मि ॥७॥

ब्रह्मानंदं ब्रह्ममुकुंदं भगवंतं सत्यं ज्ञानं सत्यमनंतं भगरूपम् ॥ पूर्णब्रह्मानंदमयं तं गुरुमूर्तिं दत्तात्रेयं

श्रीगुरुमूर्ति प्रणतोस्मि ॥८॥

आधारे लिंगनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वे पत्रे षोडशारे द्विदशदशदळे द्वादशार्धे चतुष्के ॥
वासांते बालमध्ये डफकठसहिते कंठदेशे स्वराणां
हंक्षं तत्वार्थयुक्तं सकलदळगतं वर्णरूपं नमामि
॥१॥

मूलाधारचतुर्दशारुणरुचिर्वासांतवर्णात्मकं
स्वाधिष्ठानमनेकविद्रुमनिभं बालांतषट्पत्रकम् ॥
रत्नाभं मणिपूरकं दशदळं डाद्यः फकारांतकम्
पत्रैर्द्वादशभिः अनाहतपुरं हेमं कठारांतकम ॥
मात्रा षोडशकैर्विशुद्धममलं ज्योतिर्मयं व्यापकम्
हंक्षं ह्यक्षरयुग्मपत्रसहितं तस्माच्च आज्ञापुरम्
॥२॥

तस्मादूर्द्ध्वमधोमुखं विकसितं पत्रं सहस्रारकम्
नित्यानंदभयं सदाशिवमयं हंसं सदा भावये ॥
एहो देवालयः प्रोक्तो जीवो देवः सनातनः ॥
त्यजेदज्ञाननिर्माल्यं सोहंभावेन पूजयेत् ॥३॥

॥ इति श्रीदत्तषट्चक्रस्तोत्रं संपूर्णम् ॥

**********************

अथ कामधेनुकल्पः प्रारभ्यते

श्रीगणेशाय नमः ॥

आचम्य प्राणानायम्य देश - कालौ स्मृत्वा एवंगुण - विशेषणविशिष्टायां शुभतिथौ, गोत्रंः, नामधेयंः, श्रीमान्गोत्रस्य नामध्येयस्य मम इहजन्मानि गुरोरुपदेशितस्य दशाक्षरकामधेनुमंत्रसिद्धये इत आरभ्य विंशतिदिनपर्यंतं दिनेदिने नित्यकर्मानंतरं तद्देवताउद्दिश्यं पंचोपचारपूजापूर्वकम् पंचसहस्रसंख्यांकक्रमेण विंशतिदिने लक्षसमसंख्यांकजपानंतरं जपदशांशः, एतत्संकल्पानंतरं दिनद्वयेन बिल्वफलशकलैर्बिल्वपत्रैर्वा दशसहस्रसंख्यांकघृतपायससहितहोमानंतरं, पुनः दिनैकेन शुद्धजलेन सहस्रसंख्यांकतर्पणं, ततःपरदिने एतन्मंत्रोच्चारणपूर्वकं स्वशिरसि

शतसंख्यांकमार्जनम्, ततः परदिने दशसंख्यांकब्राह्मण भोजनरूपरश्चरणकर्माहं करिष्ये ॥ ॐ अस्य श्रीकामधेनु दशाक्षरमहामंत्रस्य वसिष्ठऋषिः, गायत्रीछंन्दः, श्रीकामधेनुर्देवता, क्लीं बीजं र्ही श्रींशक्तिः, धें कीलकम्, श्रीकामधेनुप्रीत्यर्थे जपे विनियोगः ॥ ॐ क्लीं अंहृदयानमः ॐ र्हींतंशिरसे स्वाहा ॐ श्रीं मंशिखायैवौषट ॥ ॐ धें अंकवचाय हुं ॥ ॐ धेनवे नेत्रत्रयायवौषट् ॥ ॐ नमः अस्त्राय फट् ॥ लोकत्रयेण दिग्बंधः ॥ पचस्तनीं चतुःश्रृंगीं चतुष्पादां चतुर्भुजाम् ॥ चतुर्वर्गफलांदायीं भावितां सुरभीं भजे ॥ ॐ लं पृथ्वीतत्वात्त्मिकायै श्रीकामधेन्वेनमः गंधं परिकल्पयामि नमः ॥ इति पंचोपचारैः पूजा ॥ अथ मनुः ॐ क्लींर्हींश्रींधें धेनवे नमः ॥ लक्षजपेन सिद्धिर्भवति ॥

॥ इति श्रीकामधेनुकल्पः समाप्तः ॥

**************************

अथ दत्तव्याहृति प्रारभ्यते

॥ अथ दत्तव्याहृति प्रारभ्यते ॥

श्रीगणेशाय नमः ॥

ॐ मिति व्याहरेत् ॥ ॐ नमो भगवते दत्तात्रेयाय, स्मरणमात्रसंतुष्टायेति ॥ महाभयनिवारणायेति, महाज्ञानप्रसादायेति ॥ चिदानन्दात्मने बालोन्मत्तपिशाचवेषायेति, महायोगिने अवधूतायेति, अनसूयानन्दवर्धनायात्रिपुरायेति ॐ मिति व्याहरेत् ॥ भवबन्धविमोचनायेति आमिति व्याहरेत्, साध्यबन्धनायेति ह्रीं मिति व्याहरेत्, सर्वभूतिदायेति क्रोमिति व्याहरेत्, साध्याकर्षणायेति ऐमिति व्याहरेत्, वाक्प्रदायेति क्लीमिति व्याहरेत्, जगत्रयवशीकरणायेति सौमिति व्याहरेत्, सर्वमनःसंक्षोभनायेति श्रीमिति व्याहरेत्, महासपत्प्रदायेति ग्लौमिति व्याहरेत्, भूमंडलाधिपत्यप्रदायेति द्रामिति व्याहरेत्, चिरजीविनेति वषडिति व्याहरेत्, वशीकुरु

वशीकुरु वौषडिति व्याहरेत्, आकर्षयाकर्षय हुमिति व्याहरेत्, विद्वेषय विद्वेषय फडिति व्याहरेत्, मारय मारय नम इति व्याहरेत्, उच्चाटयोच्चाट ठठ इति व्याहरेत्, स्तंभय स्तंभय खेमिति व्याहरेत्, संपन्नय संपन्नय स्वाहेति व्याहरेत्, पोषय पोषय, परमंत्र - परयंत्र - परतंत्राणि छिंधि छिंधि, ग्रहान्निवारय निवारय, व्याधीन्विनाशय विनाशय दुःखान् शमय शमय, दुष्टान्मारय मारय, दारिद्र्य विद्रावय विद्रावय, देहं पोषय पोषय, चित्तं तोषय तोषय, सर्वमन्त्रस्वरूपाय, सर्वयंत्रस्वरूपाय, सर्वतंत्रस्वरूपाय, सर्वोपप्लवरूपायेति ॐ नमः शिवायेति शिद्धाय स्वाहेत्युपपनिषत् ॥अनुष्टुप् छंदः, सदाशिवो ऋषिः दत्तात्रेयो देवता, ॐ बीजं, स्वाहा शक्तिः, द्रां कीलकम् अष्टमुर्तिमन्त्रव्याख्याताभवति, योनित्यमभिधीयते वाय्वग्नि - सोमादित्य - ब्रह्म विष्णु - रुद्राः पूता भवंति, चतुर्वेदषट्शास्त्रेतिहास - पुराणानां पारगो

भवति सर्वैर्देवैर्ज्ञातो भवति गायत्र्याः शतसहस्रजपो भवति, महारुद्रशतसहस्रजापी भवति प्रणवानां अयुतकोटिजप्त्वा फलानिभवंति, शतपूर्वाच्छतोत्तरात्पंक्ति पावनात्पूर्तो भवति, ब्रह्महत्यादिपातकैर्मुक्तो भवति, अभक्षभक्षणत्पूतो भवति, तुलापुरुषादिदानप्रतिग्रहपापैर्विमुक्तो भवति, सर्वमंत्रयोगपारगो भवति, ब्रह्मणा समो भवति, तस्मात सच्छिष्यं भक्तं प्रतिग्राह्योनंतफलमश्नुते जीवन्मुक्तो भवति इत्याह भगवान्नारायणब्रह्मेंत्युपनिषत ॥ ॐ शांतिः शांतिः शांतिः इत्मुत्तरतापि नी ॥ श्रीदत्तात्रेयाय श्रीमदादिगुरुवे नमः ॥ ॐ सहनाववत्विति शांतिः शांतिः शांतिः ॥

इति श्रीदत्तव्याहृतिः समाप्ताः ॥

**************************

अथ दत्तस्तवराजः प्रारभ्यते

श्रीगणेशाय नमः ॥

श्रीशुक उवाच -

महादेव महादेव देवदेव महेश्वर ॥ दत्तात्रेयस्तवं दिव्यं श्रोतुमिच्छाम्यहं प्रभो ॥१॥

तदस्य वद माहात्म्य देवदेव दयानिधे ॥ दत्तात्परतरं नास्ति पुरा व्यासेन कीर्तितम ॥२॥

जगद्गुरुर्जगन्नाथो गीयते नारदादिभिः ॥ तत्सर्वं ब्रहू मे देव करुणाकर शंकर ॥३॥

महादेव उवाच -

श्रुणु व्यासात्मजो दिव्यं गुह्याद्गुह्यतरं महत् ॥ यस्य स्मरणमात्रेण मुच्यते सर्वबंधनात् ॥४॥

दत्तं सनातनं ब्रह्म निर्विकारं निरंजनम ॥ आदिदेव निराकारं व्यक्तं गुणविवर्जितम् ॥५॥

नामरूप - क्रियातीत निःसंगं देववंदितम् ॥ नारायणं शिवं शुद्ध दृश्यदर्शनवर्जितम् ॥६॥

परेशं पार्वतीकांतं रमाधीशं दिगंबरम् ॥ निर्मलो

नित्यतृप्तात्मा नित्यानंदो महेश्वरः ॥७॥

ब्रह्मा विष्णुः शिवः साक्षाद्गोविंदो गतिदायकः ॥
पीतांबरधरो देवो माधवः सुरसेवितः ॥८॥

मृत्युंजयो महारुद्रः कार्तवीर्यवरप्रदः ॥ ॐ
मित्येकाक्षरं बीजं क्षराक्षर पदं हरिम् ॥९॥

गया - काशी - कुरुक्षेत्र - प्रयागं बदरिकाश्रमम् ॥
एतत्सर्वं कृतं तेन ' दत्त ' इत्यक्षरद्वयम् ॥१०॥

गोमती - जान्हवी - भीमा - गंडकी च सरस्वती
॥एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयं ॥११॥

शरयू - तुंगभद्रा च यमुना पयवाहिनी ॥ एतत्सर्व
कृ० ॥१२॥

ताभ्रपर्णी प्रणीता च गौतमी तापनाशिनी
॥एत० ॥१३॥

नर्मदा सिंधु - कावेरी कृष्णावेण्यास्तथैव च
॥एत० ॥१४॥

अवन्ती द्वारका माया मल्लिनाथस्य दर्शनम

॥एत०॥१५॥

द्वादशं ज्योतिर्लिंगं च वाराहे पुष्करे तथा
॥एत०॥१६॥

ज्वालामुखी हिंगुला च सप्तशृंगस्तथैव च
॥एत०॥१७॥

अयोध्या मथुरा कांची रेणुका सेतुबन्धनम
॥एत०॥१८॥

अहोबलं त्रिपथगां गंगा सागरमेव च ॥एत०॥१९॥

करवीरमहास्थानं रंगनाथ तथैव च ॥एत०॥२०॥

एकादशीव्रतं चैव अष्टांगयोगसाधनम्
॥एत०॥२१॥

शाकंभरी च मूकांबा कार्तिकस्वामिदर्शनम्
॥एत०॥२२॥

व्रतं निष्ठा तपो दानं सामगानं तथैव च
॥एत०॥२३॥

मुक्तिक्षेत्रं च कामाक्ष्जी तुलजा सिद्धिदेवता

॥एत०॥२४॥

अन्नहोमादिकांदानं मेदिन्यश्वगजान् वृषान्

॥एत०॥२५॥

माघ - कार्तिकयोः स्नानं सन्यासं ब्रह्मचर्यकम्

॥एत०॥२६॥

अश्वमेघसहस्राणि माता - पितृप्रपोषणम्

॥एत०॥२७॥

अमितं पोषणं पुण्यमुपकारस्तथैव च

॥एत०॥२८॥

जगन्नाथं च गोकर्णं पांडुरंगं तथैव च

॥एत०॥२९॥

सर्वदेवनमस्कारः सर्वे यज्ञाः प्रकीर्तितः

॥एत०॥३०॥

शास्त्रषट्कं पुराणानि अष्टौ व्याकरणानि च

॥एत०॥३१॥

सावित्रीप्रणवं जप्त्वा चतुर्वेदांश्च पारगः

॥एत०॥३२॥

कन्यादानानि पुण्यानि वानप्रस्थस्य पोषणम्
॥एत० ॥३३॥

वापी - कूप - तडागानि काननारोपणानि च
॥एत० ॥३४॥

अश्वत्थ - तुलसी - धात्री सेवते यो नरः सदा
॥एत० ॥३५॥

शिवं विष्णुं गणेशं च शक्तिं सूर्यं च पूजनम्
॥एत० ॥३६॥

गोहत्यादिसहस्राणि ब्रह्महत्यास्तथैव च
॥एत० ॥३७॥

मुच्यते सर्वपापेभ्यो दत्त इत्यक्षरद्वयम ॥३८॥

स्वर्णस्तेयं सुरापानं मातागमनकिल्बिषम्
॥मुच्यते० ॥३९॥

स्त्रीहत्यादिकृतं पापं बालहत्यास्तथैव च
॥मुच्यते० ॥४०॥

प्रायश्चित्तं कृतं तेन सर्वपापप्रणाशनम् ॥ ब्रह्मत्वं

लभ्यते ज्ञानं ' दत्त ' इत्यक्षरद्वयम् ॥४१॥

कलिदोषविनाशार्थं जपेदेकाग्रमानसः श्रीगुरुं
परमानंदं दत्त० ॥४२॥

दत्त दत्त त्विदं वाक्यं तारकं सर्वदेहिनाम् ॥
श्रद्धायुक्तोजपेन्नित्यं दत्त० ॥४३॥

केशवं माधवं विष्णुं गोविंदं गोपतिं हरिम् ॥गुरुणां
पठ्यते नित्यं तत्सर्वं च शुभावहम् ॥४४॥

निरंजनं निराकारं देवदेवं जनार्दनम् मायायु ( मु )
क्तं जपेन्नित्यं पावनं सर्वदेहिनां ॥४५॥

आदिनाथं सुरश्रेष्ठं कृष्णं श्यामं जगद्गुरुम् ॥
सिद्धराजं गुणातीतं रामं राजीवलोचनम् ॥४६॥

नारायणं परंब्रह्म लक्ष्मीकांतं परात्परम् ॥ अप्रमेयं
सुरानंदं नमो दत्तदिगंबरम् ॥४७॥

योगिराजोऽत्रिवरदः सुराध्यक्षो गुणांतकः
अनुसूयात्मजो देवो देवो त्गतिप्रदायकः ॥४८॥

गोपनीयं प्रयत्नेन यदि देवमुनीश्वरैः
समस्तत्रऋषिभिः सर्वैभक्त्या स्तुत्वा महात्मभिः

॥४९॥

नारदेन सुरेंद्रेण सनकाद्यैर्महात्मभिः ॥ गौतमेन च गार्गेण व्यासेन कपिलेन च ॥५०॥

वामदेवेन दक्षेण अत्रि - भार्गव - मुद्गलैः ॥ वसिष्ठप्रमुखैः सर्वैर्गीयते सर्वदाऽदरात् ॥५१॥

विनायकेन रुद्रेण महासेनेन वै सदा ॥ मार्कंडेयेन धौम्येन कीर्तितं स्तवमुत्तमम् ॥५२॥

मरीच्यादिमुनीद्रैश्च शुक - कर्दमसत्तमैः ॥ अंगिराकृतपौलस्त्य - भृगु - कश्यपजैमिनी ॥५३॥

गुरुस्तवमधीयानो विजयी सर्वदा भवेत् ॥ गुरोः सायुज्यमाप्नोति गुरोर्नाम पठेद्बुधः ॥५४॥

गुरोः परतरं नास्ति सत्यं सत्य न संशयः ॥ गुरोः पादोदकं पीत्वा गुरुनाम सदा जपेत् ॥५५॥

तेऽपि सन्यासिनो ज्ञेया इतरे वेषधारिणः ॥ गंगाद्याः सरितः सर्वे गुरोः पादांबुजे सदा ॥५६॥

गुरुस्तवं नजानाति गुरुनाम मुखे नहि ॥ पशुतुल्यं

विजानीयात्सत्यं सत्यं महामुने ॥५७॥

इति स्तोत्रं महादिव्यं स्तवराजं मनोहरम् ॥
पठणाच्छ्रवणाद्वापि सर्वान्कामानवाप्नुयात् ॥५८॥

॥इति श्रीमन्महादेवशुकसंवादे दत्तस्तवराजं संपूर्णम् ॥ श्रीदत्तात्रेयार्पणस्तु ॥

**********************

अथ श्रीदत्ताष्टकम्

श्रीदत्तात्रेयाय नमः ॥

आदौ ब्रह्ममुनीश्वरं हरिहरं सत्वं - रजस्तामसम्
ब्रह्मांडं च त्रिलोकपावनकरं तैमूर्तिरक्षाकरम् ॥
भक्तानामभयार्थरूपसहितं सोहं स्वयं भावयन्सोहं
दत्तदिगंबरं वसतु मे चित्ते महत्सुंदरम् ॥१॥

विश्वं विष्णुमयं स्वयं शिवमयं ब्रह्मामुनींद्रामयं
ब्रह्मेंद्रादिसुरोगणार्चितमयं सत्य समुद्रामयम् ॥
सप्तं लोकमय़ं स्वयं जनमयम् मध्यादिवृक्षामयं

सोहं दत्तदिगंबरं वसतु मे चित्ते महत्सुंदरम् ॥२॥

आदित्यादिग्रहा स्वधाऋषिगणं वेदोक्तमार्गे स्वयं
वेदं शास्त्र - पुराणपुण्यकथितं ज्योतिस्वरूपं
शिवम् ॥ एवं शास्त्रस्वरूपया
त्रयगुणैस्त्रैलोक्यरक्षाकरं सोहं दत्तदिगंबरं वसतु
मे० ॥३॥

उत्पत्ति - स्थिति - नाशकारणकरं कैवल्यमोक्षाकरं
कैलासादिनिवासिनं शशिधरं रुद्राक्षमालागळम् ॥
हस्ते चप - धनुःशराश्च मुसलं खट्वांगचर्माधरं
सोहं दत्तदिगंबरं वस्तु मे० ॥४॥

शुद्धं चित्तमयं सुवर्णमयदं बुद्धिं प्रकाशमयं
भोग्यंभोगमयं निराहतमयं मुक्तिप्रसन्नामयम् ॥
दत्तं दत्तमयं दिगंबरमयं ब्रह्मांडसाक्षात्करं सोहं
दत्तदिगंबरं वसतु मे० ॥५॥

सोहंरूपमयं परात्परमयं निःसगनिर्लिप्तकं नित्यं
शुद्धनिरंजनं निजगुरुं नित्योत्सवं मंगलम् ॥ सत्यं
ज्ञानमनंतब्रह्महृदयं व्याप्तं परोदैवतं सोहं
दत्तदिगंबरं वसतु मे० ॥६॥

काषायं करदंडधारं पुरुषं रुद्राक्षमालागलं
भस्मोत्धूलितलोचनं कमलजं कोल्हापुरीभिक्षणम्
॥ काशीस्नानजपादिकं यतिगुरुं तन्माहुरीवासितं
सोहं दत्तदिगंबरं वसतु मे० ॥७॥

कृष्णातीरनिवासिनं निजपदं भक्तार्थसिद्धिप्रदं
मुक्तिं दत्तदिगंबरं यतिगुरुं नास्तीति लोकांजनम् ॥
सत्यं सत्यमसत्यलोकमहिमा - प्राप्तव्यभाग्योदयं
सोहं दत्तदिगंबरं वसतु मे चित्ते महत्सुंदरम् ॥८॥

॥ इति श्रीशंकराचार्यकृतं दत्ताष्टकं संपूर्णम् ॥

*************************

अथ श्रीदत्तोपनिषत् ( पूर्वतापिनी )

श्रीगणेशाय नमः ॥

हरिः ॐ भद्रकर्णेभिः
श्रृणुयामदेवाभद्रंपश्येमाक्षभिर्जयत्राः ॥
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यश्येम देवहितं यदायुः
॥ भद्रंकर्णेभिरितिशांतिः ॥ ॐ चिन्मयं व्यापितं

सर्वं आकाशं जगदीश्वरम् ॥ निर्विकल्पं स्वयं ब्रह्मा तस्याहं पंचमाश्रमम् ॥१॥

निराकारं निराभासं निरालंबं निरंजनम् ॥ निःशब्द उच्यते ब्रह्म तस्याहं पंचमाश्रमम् ॥२॥

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतीश्वराः ॥ आश्रमाणां विभिन्नोहं तस्याहं पंचमाश्रमम् ॥३॥

आश्रमाणां च सर्वेषां अस्ति नास्ति न चात्मनि ॥ भिन्नाभिन्नं नपश्यंति तस्याहं पंचमाश्रमम् ॥४॥

आब्रह्मस्तंभपर्यंतं संपूर्णं परमात्मनः ॥ भिन्नाभिन्नं नपश्यंति तस्याहं पंचमाश्रमम् ॥५॥

मनस्थं मनमध्यस्थं मनमायाविवर्जितम ॥ मनसा मन आलोक्य तस्याहं पंचमाश्रमम् ॥६॥

अगोचरं चैकब्रह्म तस्यदेहे विलीयते ॥निवर्तते क्रियाः सर्वास्तस्याहं पंचमाश्रम् ॥७॥

निरालंबपदं प्राप्तं यत्र ज्योतिर्लयं गतः ॥ निवर्तंते क्रियाः सर्वास्तस्याहं पंचमाश्रमम् ॥८॥

स्वयं दाता स्वयं भोक्ता स्वयं देवो महेश्वरः ॥

निर्विकल्पे स्वयं ब्रह्म तस्याहं पंचमाश्रमम् ॥९॥

क्वचिद्योगि क्वचिद्भोगी क्वचिद्नग्नःपिशाचवत् ॥ स्वयमात्मस्वरूपेण तस्याहं पंचमाश्रमम् ॥१०॥

अभिन्नमात्मनोरूपं जगदेतच्चराचरम् निर्विकल्पं स्वयं ब्रह्म तस्याहं पंचमाश्रमम् ॥११॥

आत्मज्ञानं विना योगी ब्रह्मचारी कथं भवेत् ॥ गृही वा वानप्रस्थो वा यतिर्योगं विना नहि ॥१२॥

ॐ भद्रंकर्णेभिः श्रृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यश्येम देवहितं यदायुः ॥ स्वस्तिनऽइंद्रावृद्धःश्रवाः ॥ ॐ शांतिः शांतिः शांतिः ॥

॥ इति श्रीदत्तोपनिषत् पूर्वतापिनी समाप्तः ॥१४॥

**********************

अथ श्रीदत्तोपनिषत् ( उत्तरतापिनी )

श्रीगणेशाय नमः ॥

सहनाववत्वितिशांतिः ॥ तस्य क्षेत्रे ब्रह्मा नारायणं प्रणिपत्याह ॥ अधीहि भगवान् योगविद्यारहस्यम ॥ यस्मिन विदिते योगी भोगी भवति ॥ इत्युक्त्वा सत्यानंदचिदात्मकेवलसात्विकं मामकं धामोपास्येति ब्रह्माणमाह ॥ सदा दत्तोमेतत्पदं ये वदंति न ते संसारिणो भवंति ॥ ॐ मित्येकाक्षरम ॥ दत्तात्रेयाय चतुरक्षरम ॥ श्रीदेवदत्तेति पंचमाक्षरम । य इमानि विद्यानामानि दशवारमुच्चरेत् ॥ विश्वरूपधरो विष्णुर्नारायणो दत्तात्रेयस्तमिन् भगवान् प्रसीदति ॥ दशमेषु दिवसेषु स्वन्परूपं प्रदर्शयति ॥ अथ एकाक्षरं व्याख्यास्ये ॥ ‘ दत्त ’ शब्दमुच्चार्यरेफं सबिंधुकम् वदेत् ॥ र्हामिति र्हस्वो भवति ॥ इमं मंत्रं जप्त्वा वेदव्यासो भगवान् अष्टादशपुराआण्नि चकार ॥ दक्षिणामुर्तिबीजमुक्वा रामबीजं वदेत् ॥द्रामित्येकाक्षरमंत्रो भवति ॥ तदेतत्तारकं भवेति

॥ तदेवोपासितव्यमिति ज्ञेयम ॥ मंत्रमिमं जप्त्वा नमातृगर्भं प्रविशति ॥ ब्रह्मा - विष्णु - शिवात्म कमिदमेकाक्षरम् ॥ सर्वदा जप्यमिदं नदेश कालनियमोत्र विद्यते ॥ एतन्मंत्रजपमेव मुख्यः क्रियायोगः ॥ अनेन सच्चिदानंदब्रह्मैव भवति ॥ न स पुनरावर्तते न स पुनरावर्तते । वटबीजवृक्षस्यैव दत्तबीजस्थं सर्वजगत्त्रयमेतत् ॥

ॐ मिति प्रथमम् ॥ श्रीमिति द्वितीयम् ॥ ह्रींमिति तृतीयम् ॥ क्लीमिति चतुर्थम् ॥ ग्लौमिति पंचमम् ॥ ब्रह्मा - विष्णु - शिवात्मकं दत्तैकाक्षरं षष्ठम् । षड्क्षरमयं भवति, सर्वसंपत्समृद्धिकारी भवति, योगानंदःप्राप्तो भवति, एतन्मंत्रजपेन राजा भवति, त्रयाणां शबररूपी सदाशिवो ऋषिः, गायत्रीच्छंदः, दत्तात्रेयो देवता, द्रामिति प्रथमं व्याहरेत्, दत्तात्रेयायेति पश्चात्, नम इत्यष्टाक्षरमंत्रो भवति ॥ गायत्रीच्छंदः, दत्तात्रेयो देवता, मनुमेनं जप्त्वा दत्तात्रेयाय इति सत्यानंदचिदात्मकं नम इति पूर्णानंदचिदात्मकं विग्रहं पश्यति ॥ ॐ कारमादौ

ब्रूयात् ॥ सानुस्वरं द्वितीय स्वरं वदेत् ॥ ह्रींमिति पश्चात् ॥ क्रोमिति चतुर्थम् ॥ एहीति वदेत् ॥ दत्तात्रेयायेति संबुद्धिः ॥ स्वाहेति मंत्राअजोयं द्वादशाक्षरः ॥ जगतीच्छंदः, सदाशिवोऋषिः, दत्तात्रेयो देवता, ॐ बीजं, स्वाहा शक्तिः, संबुद्धिः कीलकम्, ॐ आमिति हृदये, ह्रींक्रोमिति शिरसि, एहीति शिखायां, दत्तेति कंठे, आत्रेयायेति नेत्रे, स्वाहेत्यस्त्रम्, तन्मंत्रमयो भवति ॥ अक्षरलक्ष जपाद्देवतासाक्षात्कारो भवति ॥ इंद्रपुरोगमास्त्रयस्त्रिंशत्कोटिदेवताः प्रसन्ना भवंति ॥ सप्तकोटिमुनीश्वराः नवकोटिसिद्धगंधर्वादयश्च भवति ॥ कोटिशो यो मंत्रो जपति दत्तात्रेयसमानो भवति ॥ अक्षरकोटिसंख्याकं मंत्रं जपति स जरा - मरणहीनः सिद्धो भवति ॥ परकायप्रवेशसामर्थं लभते ॥ अत्रैते श्लोकाः भवंति - खड्गस्तंभो जलस्तंभो सेनास्तंभस्तथैव च ॥
इच्छासिद्धिर्वशित्वं च दिक्पालैः सह भाषणम् ॥
वायुवद्गतिरित्याहुराल्हादित्वं च सोमवत् ॥

अग्निवत्सर्वभक्षत्वं नित्यतृप्तित्वमेव च ॥
सर्वभाषापरिज्ञानं सर्वचित्तावबोधनम् ॥ वापी - कूप - समुद्राणां पर्वतानां च चालनम् ॥ दत्तात्रेयमयो स्वच्छो व्यासतुल्यो भवेदिति ॥
षोडशाक्षरं व्याख्यास्ये ॥ प्राणो देयो मनो देयं चक्षुर्देयं च खंडशः ॥ शरीरं हित्वा ( शरीरयित्वा ) वा देयम् - षोडशाक्षरमंत्रो नदेयो भवति ॥
अतिसेवापरो क्लामिति तृतीयम्, क्लीमिति चतुर्थम्, क्लूमिति पंचमम्, र्हामिति षष्ठम्, र्हीमिति सप्तमम्, र्हूमित्यष्टमम्, सौरिति नवमम्, दत्तात्रेयायेति चतुर्दशम्, नम इति षोडशम् ॥ ॐ बीजं, नमःशक्तिः, दत्तात्रेयायेति कीलकम् ॥ ॐ ऐमिति हृदये ॥ क्लांक्लींक्लूमितिशिरसि ॥ र्हां र्हीं र्हूमिति शिखायाम् ॥ सौरिति कवचे ॥
दत्तात्रेयायेति चक्षुषि ॥ नम इति अस्त्रं ॥ यो नित्यमधीयानः सच्चिदानंदस्वरूपे स्फुरति मुक्तिर्भवति सौरित्यंते विष्णुवन्नित्युच्यते ॥
तज्जपे श्रीविष्णुरूपी भवति ॥ अथानुष्टुभं

व्याख्यास्ये ॥ सर्वमंत्रसंबुद्धिर्नामाति इत्युच्यते ॥ दत्तात्रेय हरे कृष्ण उन्मत्तानंददायक ॥ दिगंबर मुने बालपिशाचज्ञानसागरः ॥ सागरेत्युपनिषत् ॥अनुष्टुप् छंद ॥ दत्तात्रेयो देवता, दत्तात्रेयेति हृदये ॥ हरे कृष्णेति शिरसि ॥ उन्मत्तानंददायकेति शिखायाम् ॥ दिगंबरेति बाव्होः ॥ मुने बालेति चक्षुषि ॥ पिशाचज्ञानसागरेत्यस्त्रम् ॥ अनुष्टुभो योयमधीते आब्रह्महननदोषाः प्रणश्यंति ॥ सर्वोपकारी मुक्तिर्भवति ॥ य एवं वेदेत्युपनिषत् ॥ सहनाववतु सहनौभुनक्तु सहवीर्यंकरवावहै ॥ तेजस्विनावधीतमस्तु माविद्विषावहै ॐ शांतिः शांतिः शांतिः ॥

*************************

जयलाभादिकरं श्रीदत्तस्तोत्रम्

दत्तात्रेय महात्मानं वरदं भक्तवत्सलम् ।
प्रपन्नार्तिहरं वन्दे स्मर्तृगामी स माऽवतु ॥१॥

दीनबन्धु कृपासिंन्धु सर्वकारणकारणम् ।
सर्वरक्षाकरं वन्दे स्मर्तृगामी स माऽवतु ॥२॥

शरणा गतदीनार्तपरित्राणपरायणाम् । नारायणं
विभुं वन्दे स्मर्तृगामी स माऽवतु ॥३॥

सर्वानर्थहरं वन्दे सर्वमङ्गलमङ्गलम् । सर्वक्लेशहरं
वन्दे स्मर्तृगामी स माऽवतु ॥४॥

ब्रह्मण्यं धर्मतत्त्वज्ञं भक्तकीर्तिविवर्धनम् ।
भक्ताभीष्टप्रदं वन्दे स्मर्तृगामी स माऽवतु ॥५॥

शोषणं पापपङ्कस्य दीपनं ज्ञानतेजसः ।
तापप्रशमनं वन्दे स्मर्तृगामी स माऽवतु ॥६॥

सर्वरोगप्रशमनं सर्वपीडानिवारणम् । आपदुद्धरणं
वन्दे स्मर्तृगामी स माऽवतु ॥७॥

जन्मसंसारबंधघ्नं स्वरूपानन्दायकम् ।
निःश्रेयसप्रदं वन्दे स्मर्तृगामी स माऽवतु ॥८॥

जयलाभयशःकामदातुर्दत्तस्त यः स्तवम् ।
भोगमोक्षप्रदस्येमं प्रपठत्स कृती भवेत् ॥९॥

*********************

## दत्तनामस्मरणम्

शास्त्रं शस्त्रं मल्लविद्यादि सर्वं स्नानं ध्यानं योगयोगादिकं च । पूर्तेष्टादि प्राणवित्तापहारि श्वासे श्वासे दत्तनाम स्मरात्मन् ॥१॥

न त्वायासो वित्तहनिर्न चैवं प्रत्यादेशो नो कवित्वाद्यपेक्षा । सर्वश्रेष्ठं साधनानां वरिष्ठं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥२॥

कामं क्रोधं जेतुकामो यदि स्याः शोकं मोहं त्यक्तुकामोऽथवा चेत् । रागद्वैषौ हातुकामोऽथ बन्धो श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३॥

बाल्यं खेलौ कामिनीषु प्रकामं तारुण्यं ते मूड्य्ह व्यर्थं गतं भोः । वृद्धत्वं हा मृत्युमार्गानुसारि श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४॥

जायापुत्रक्षेत्रवित्तादि सर्वम् अश्वस्थं तद् धायते मूढ कस्मात् । आदावन्ते दुःखमूलं च मध्ये श्वासे श्वासे दत्तनाम स्मरात्मन् ॥५॥

जातं कस्माद् गम्यते कुत्र बन्धो स्थानं कस्माच्चिन्तयाहर्निशं तत् । सर्वं ह्यार्तं त्रीशनामैव सत्यं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥६॥

नाना धर्मा भ्रान्तिमूलाश्च सर्वे ह्येकं सत्यं नाशवत्सर्वमन्यत् । नाना मार्गाः कष्टमूलाश्च सर्वे श्वासे श्वासे दत्तनाम स्मरात्मन् ॥७॥

प्राप्तः पूर्वाण्ह पराण्हे च सायं रात्रीवेवं पूर्वरात्रे निशीथे । प्रत्यूषेऽपि त्रीशमेकं वदार्भ श्वासे स्व्हासे दत्तनाम स्मरात्मन् ॥८॥

स्नाने पाने भोजने यानकाले कार्येऽकार्ये ह्युत्थितं चोपविष्टम् । सुप्तौ स्वप्ने चिन्तय त्रीशमेकं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥९॥

त्यक्त्वालस्यं तामसं पापमूलं जन्माभ्यासं राजसं कर्म सर्वम् । भक्तिप्राप्यं त्रीशमेकं प्रयहि श्वासे श्वासे दत्तनाम स्मरात्मन् ॥१०॥

वित्तं भूमावश्वयानादि गोष्ठे मैत्र मार्गे बान्धवादी श्मशाने । देहो वन्हौ देहलिस्यं कलत्रं श्वासे याते

कोऽपि सार्धं न याति ॥११॥

वेदं वादं वादशूरेषु हित्त्वा काव्यं भाणं भण्डवीरे विहाय । नृत्यं गीतं नादलुब्धे समर्प्यं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥१२॥

स्वाद्वस्वादू सत्कदन्नादि मुक्त्वा हीने हर्म्येऽहीरघोषे शयित्त्वा । चीरं चेलं क्षौमवल्कादि धृत्वा श्वासे श्वासे दत्तनाम स्मरात्मन् ॥१३॥

मन्त्रं तन्त्रं यन्त्रविद्यादि सर्वं त्यक्त्वा दूरे तीर्थयात्रादिकं च । पाठं पूजां पुण्ड्रमेवापि कष्टं श्वासे श्वासे दत्तनाम स्मारात्मन् ॥१४॥

आयुः स्वल्पं स्वल्पमत्यन्तमेव कालव्याघ्रो मर्त्यमेष निहन्ति । तारुण्य ते वारिपूरप्रकल्पं श्वासे श्वासे दत्तनाम स्मरात्मन ॥१५॥

इष्टद्रव्यं दृष्टानन्ष्टस्वरूपं कीर्तिः का सा पद्मपत्राम्बुकल्पा । त्यक्त्वा व्यर्थ लोकनृत्यानुनृत्यं श्वासे श्वासे दत्तनाम स्मरात्मन ॥१६॥

सार्थ सर्वे मानयन्ति प्रकामं निःखं कोऽपि मेक्षते

नैव लोके । स्वार्थः प्रेष्ठो दुर्लभो यः परार्थी श्वासे श्वासे दत्तनाम स्मरात्मन् ॥१७॥

यावत्स्वस्थं रोगहीनं वपुः स्याद् यावत्कालो नेक्षते सेर्ष्यमत्र । तावत्कालो जागृहि त्वं प्रमादिञ्च श्वासे श्वासे दत्तनाम स्मरत्मन् ॥१८॥

निद्रासि त्वं निर्भरं देहगेहे चोराश्चान्तः सर्वतो हा विशन्ति । मुष्णन्त्येते ह्यात्मवित्तं प्रवृष्य ह्युतिष्ठात्मन् स्वापमेतं जहीहि ॥१९॥

केचिद्याता ह्यर्धयातश्च केचित् केचिन्मार्गे नीयमाना पुरस्ते । निद्रासि त्वं केन सौख्येन मूढ श्वासे श्वासे दत्तनाम स्मरात्मन् ॥२०॥

कामी भोगें ब्रह्मचर्येऽतिक्लिबो मूर्खो दाने दानशून्ये कदर्यः । भक्ताबन्धो नास्तिको भक्त्यभावे सर्वं त्वेवं दुर्जनैर्दूषितं स्यात् ॥२१॥

क्षन्तव्योऽस्माल्लौकजल्पोऽनिवार्यो नो हातव्यो धर्ममार्गः कदाचित् । ग्राह्यं नित्यं दत्तनामामृतं सत् त्याज्यः सङ्गो दुःसहो दुर्जनानाम् ॥२२॥

माता दत्तस्त्वत्पिता दत्त एव । स्वामी दत्तस्ते सखा दत्त एव । त्यक्त्वा ह्येनं वीक्षसे कुत्र चान्यं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥२३॥

गन्तव्यं ते दूरमत्यन्तमेव मार्गे मा गाः सौख्यमल्पेन तुष्टः । सर्वे ह्येते धूर्तपाटच्चरास्ते हृत्त्वा सर्वं त्वां बहिष्कासयन्ति ॥२४॥

लब्ध्वा साङ्गं मानुषं जन्म मूढ विक्रीणीषे धिग्वराटार्थमेतत् । प्राप्यं नैतत्पुण्यकोटिं विनान्ध श्वासे श्वासे दत्तनाम स्मरात्मन् ॥२५॥

यावद्वित्तं ह्यार्जते पुष्कलं ते सौख्यं तावत्पृछ्यते मूढ सर्वैः । नष्टे सारे लोक्यते सर्वतोऽज्ञं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥२६॥

हास्यं दृष्ट्वा हस्यते दर्वलोकैर्दुःखाश्रूणी हा न कोऽपि प्रमार्ष्टि । कुर्वंन्मे मे किं मूर्तिं यासि मेष श्वासे श्वासे दत्तनाम स्मरात्मन् ॥२७॥

क्षुद्व्याध्यर्थं ह्यौषधं भैक्ष्यमुक्तं शीताद्यार्तिध्वंसहेतोस्तु वासः । अन्यस्वेच्छा तन्यते

मूढ कस्माच्छ्वासे श्वासे दत्तनाम स्मरात्मन्
॥२८॥

काष्ठांश्वग्नीन् यो मृतस्यापि दत्ते किं वृत्तिं नो जीवयुक्तस्य तेऽसौ । श्रद्धायुक्तं तस्य पादौ गृहाण श्वासे श्वासे दत्तनाम स्मरात्मन् ॥२९॥

मिथ्याऽयं ते र्तो मोहमूलोऽभिमानो यानश्वानस्येव कर्तृत्वमूलः । त्रीशादान्यः कः प्रभुः स्यात्त्रिलोक्यां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३०॥

भीवास्यैवार्कोऽपि प्रातर्ह्युदेति नक्तं चेन्दुर्निर्मलं खे विभाति । ऊर्ध्वं क्षिप्तं वस्तु निम्नं प्रयाति श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३१॥

इन्द्रः काले वर्षति त्यक्तगर्वं भूमिः शुष्का सस्यपूर्णा विभाति । जग्धं ह्यन्नं पच्चते जाठरेण श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३२॥

सत्यं शौचं ब्रह्मचर्यादिकं च श्रद्धा क्षान्तिस्तोष एतच्चिनुष्व । दूरीकृत्यान्यत्प्रतीपं यदस्य श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३३॥

त्याज्यः सङ्गः सर्वथा दुःखमूलं नो चेच्छक्यः सद्भिरेव प्रकार्यः त्यक्त्वा निन्दां योषितोऽन्यस्य चर्चां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३४॥

त्याज्यः कामः सर्वथा जन्ममूलं नो चेच्छक्यस्त्रीशप्राप्त्यै विधेयः । त्रीशो दत्तो ह्यौशधं दुःखव्याधेः श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३५॥

क्रोधस्त्याज्यः सर्वथा पापमूलं नो चेत्कार्यस्तीब्रपापप्रकोपे । त्यक्त्वा व्यर्थं ह्यन्यदोषेक्षण्म च श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३६॥

प्राणायामं पीडणं नासिकायाः पत्तान्याद्युत्तापनं देहवल्लेः । वृक्षस्कन्धोद्बन्धनादि प्रहाय श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३७॥

मार्गे मार्गे पर्वतप्रायविघ्ना विघ्ने विघ्ने धैर्यसारच्युतिः स्यात् । तो चेद्दत्तालम्बनं वज्रसारं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥३८॥

यामिन्येषा बद्धभीमान्धकारा भूता ह्येतद्दीपयन्तो

भ्रमति । भीमारालैस्तर्जयन्तः समस्ताछवासे श्वासे
श्वासे दत्तनाम स्मरात्मन् ॥३९॥

पश्याकाशं ह्यम्बुदैर्व्याप्तमेतन्मेघा ह्येते
गर्जयन्तश्चरन्ति । विद्युद्गर्भाः कम्मयन्तोऽ -
द्रिसानूञ श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४०॥

श्वाना ह्येते भीषणं हा भषन्ति पादौ श्लिष्ट्वा
गूढमन्तर्दशन्ति । त्यक्त्वा ह्येतान्दूरतो याहि बन्धो
श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४१॥

कूजत्युद्याने कलं कोकिलोऽसौ रेवा सापि
त्रीशागनं करोति । शेषे लम्बं हा कथं कुम्भकर्ण
श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४२॥

कृत्त्वा केकां नीलकण्ठोऽपि नौति बर्हाण्युत्सार्य
प्रभुं बीजयत्यु । कामं तल्पे सुप्यते ते कथं धिक्
श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४३॥

वाणिज्येच्छा वर्तते चेत्करुष्व वाणिज्यं भो
नामसङ्कीर्तनस्य । हानिः कष्टं नो कदाष्यल्पमत्र
श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४४॥

चिंत्तं बन्धो वर्तते कर्षणे चेत् कामं कुर्याः सद्गुणानां कृषिं भोः । नो भीतिः स्याद्वर्षणावर्षणस्य श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४५॥

सेवा बन्धो मन्यते चेद्दरिष्ठा त्यक्त्वा मानं साधुसेवां विधेहि । भीतिर्नो स्यादर्धचन्द्रस्य चात्र श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४६॥

योगेच्छा चेत्त्रीशयोगं प्रयुङ्क्ष्व भोगेच्छा चेदात्मसौख्यं च भुङ्क्ष्व । स्वायत्तं यच्छाश्वतं तृप्तिपूर्णं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४७॥

कायो माया मोहहेतुश्च मूढ नो स्वायत्ता विञ्चिका ह्यन्तकाले । एवं चेत्तत्स्वेच्छया नार्प्यते किं त्रीशस्याङ्घ्र्योर्दासभावेन मूढ ॥४८॥

आयास्यन्ति त्वत्र दूता यमस्य बद्ध्वा पाशैर्नेतुकाम भवन्तम् । को वा प्राणिन्मोचयिष्यत्यमीभ्यः श्वासे श्वासे दत्तनाम स्मरात्मन् ॥४९॥

योऽदाद्वाचं त्वीक्षणादिप्रशक्तिं देवः कोऽसौ मृग्यतें किं कदाचित् । त्रीशो दत्तो जीवनं जीवसृष्टेः श्वासे श्वासे दत्तनाम स्मरात्मन् ॥५०॥

राजाज्ञायाः पालनात्कृष्यतेऽसो तद्वत्स्वाज्ञापाननादेव देवः । नूनं दासस्य त्वनन्यस्य चिन्ता भर्तुः काले नैव दासं जहाति ॥५१॥

त्रीशो धीशास्तारकास्तिष्ये एकः सर्वांस्त्यक्त्वा तं शरण्यं प्रयाहि । स्रग्वाद्यार्यैब्जत्रिशूलादि धृत्वा भक्तान्पाति प्रेमबन्धेन बद्धः ॥५२॥

मार्गोऽयं तेऽत्यन्त वैषम्यपूर्णो हिंस्रव्याप्तः शूलकीर्णोऽतिभिमः । धीरं धृत्वात्रेयदीपं प्रयाहि श्वासे श्वासे दत्तनाम स्मरात्मन् ॥५३॥

को जानीते श्वः कथं वर्तते ते कामाग्रस्ते जीवलोके समन्तात् । कर्तव्यं यच्छीध्रमेबावधेहि श्वासे श्वासे दत्तनाम स्मरात्मन् ॥५४॥

मार्गे मार्गे नूतनास्वर्णवीथिर्वीथौ वीथौ काञ्चनं

नेत्रकर्षि । धृत्वा बालान्स्वर्णकारारतुदन्ति श्वासे
श्वासे दत्तनाम स्मरात्मन् ॥५५॥

मार्गे मार्गे मिष्टलड्डूकगेहं गेहे गेहे लड्डुकाः
स्वादपूर्णाः । रिञ्चन्त्यज्ञान्मोहयित्वा रसाद्यैः
श्वासे श्वासे दत्तनाम स्मरात्मन् ॥५६॥

मग्नप्रायो वासनावारिपूरे हन्तात्मँस्ते द्रुस्तरे
कायकोलः । देवं दत्तं कर्णधारं वृणीष्व नान्यः
कश्चित्पारयेत्वा तदोधात् ॥५७॥

कः कावन्यो दुःखहर्तेति चक्ष्व कारुण्यब्धिं
दत्तमेवेहि दीन । श्रद्धत्स्वैतद्वच्मि ते सारभूतं श्वासे
श्वासे दत्तनाम स्मरात्मन् ॥५८॥

माता कुप्येद्रक्षितात्रास्ति तातः क्रुद्धे ताते
रक्षतीहास्य चाम्बा । क्रुद्धे रक्षत्को नु दत्ते
त्रिलोक्यां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥५९॥

भूतौ सर्वे भोक्तुकामा मिलन्ति नष्टैश्वर्ये तत्क्षणे
विस्मरन्ति । संबन्धास्ते स्वार्थमूला ह मूढ श्वासे
श्वासे दत्तनाम स्मरात्मन् ॥६०॥

सस्याकीर्णं शाद्वलं पश्य सर्वं धावन्त्येता
धेनवोऽपि प्रहर्षम । शुष्कं नेयाद्रासभोऽपि
प्रमादाच्छ्वासे श्वासे दत्तनाम स्मरात्मन् ॥६१॥

कामूस्याप्तिं दुःखदोषणाष्टिं निःस्वस्येष्टिं
वृद्धपङ्गोस्तु यष्टिम् । पुण्याकृष्टिं पापप्रेतप्रकष्टिं
श्वासे श्वासे दत्तनाम स्मरात्मन् ॥६२॥

शक्तौ दत्तं शक्तिनाशेऽपि दत्तं भूतौ दत्तं
भूतिनाशेऽपि दत्तम् । बाल्ये दत्तं वृद्धभावेऽपि दत्तं
श्वासे श्वासे दत्तनाम स्मरात्मन् ॥६३॥

याने दत्तं पादयोनऽपि दत्तं ग्रामे दत्तं दत्तमेव
श्मशाने । गोष्ठे दत्तं मन्दिरे दत्तमेव श्वासे श्वासे
दत्तनाम स्मरात्मन् ॥६४॥

लग्ने दत्तं सूतके दत्तमेव क्षेत्रे दत्तं दत्तमेवापि पीठे
। काले दत्तं दत्तमेवाप्यकाले श्वासे श्वासे दत्तनाम
स्मरात्मन् ॥६५॥

लोके दत्त दत्तमेव त्वरण्ये कार्यागारे भीमाकारागृहे
च । काशीक्षेत्रे त्वन्त्यजाभीरघोषे श्वासे श्वासे

दत्तनाम स्मरात्मन् ॥६६॥

दत्तस्त्वेको जीवनं जीवनानां दत्तस्त्वेको मार्णं मारणानाम् । दत्तस्त्वेको भीषणं भीषणानां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥६७॥

दत्तस्त्वेको कारणं कारणानां दत्तस्त्वेको जारणं जारणानाम् । दत्तस्त्वेकस्तारणं तारणानां श्वासे दत्तनाम स्मरात्मन् ॥६८॥

दत्तस्त्वेको भेपनं भेपजानां दत्तस्त्वेको ह्यञ्जनं चाञ्जनानाम् । दत्तस्त्वेको ह्यमृतं चामृतानां श्वासे श्वासे दत्तनाम स्मरत्मन् ॥६९॥

दत्तस्त्वेको भूपतिर्भूपतीनां दत्तस्त्वेकोस्त्वीश्वराणाम् । दत्तस्त्वेकोदेशिको देशिकानां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥७०॥

दत्तस्त्वेको ब्राह्मणो ब्राह्मणानां दत्तस्त्वेकः क्षत्रियः क्षत्रियाणाम् । दत्तस्त्वेको वैश्यजो वैश्यजानां दत्तस्त्वेको ह्यन्त्यजस्त्ववन्त्यजानाम् ॥७१॥

दत्तत्स्वेकः पालकः पालकानां दत्तस्त्वेकः पोषकः

पोषकाणाम् । दत्तस्त्वेको मोक्षदाता नाराणां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥७२॥

दत्तस्त्वेको ज्योतिषा ज्योतिरद्धा
दत्तस्त्वेकश्छन्दसां छन्द आद्यम् ।
दत्तस्त्वेकालम्बनं कौ कवीनां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥७३॥

दत्तस्त्वेको भासको भासकानां
दत्तस्त्वेकश्चालकश्चलकानाम् । दत्तस्त्वेकः पावनः पावनानां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥७४॥

सर्वे देवा दत्तमेवास्तुवन्ति वेदाः सर्वे
दत्तमावर्णयन्ति सर्वे भेदो दत्तमेवानयन्ति श्वासे श्वासे दत्तनाम स्मरात्मन् ॥७५॥

नाम्ना तीर्णो रामगाथाकृदादौ नाम्ना
तीर्णोऽजमिलोऽप्यन्तकाले नाम्ना तीर्णा पिङ्गला पण्ययोषा श्वासे श्वासे दत्तनाम स्मरात्मन् ॥७६॥

कायः काशी ह्यात्मदेवोऽत्र दत्तो वामा गङ्गा
दक्षनासाऽर्कजाऽत्र । मध्याऽजा सा सङ्गमो

ब्रह्मरन्धे स्त्रात्वा ध्यात्वा मुच्यते मुक्त एव ॥७७॥

देहः सह्यो हृन्नु मातापुरं स्यादत्रिर्ज्ञानं भक्तिरेकाऽनसूया । विज्ञानं तन्निर्मलं दत्तनाम ध्यात्त्वा सन्तो जन्ममृत्यु तरन्ति ॥७८॥

गेयं तिव्ये तारकं दत्तनाम ध्येयं स्वान्ते निर्मलं दत्तधाम । नेयं ह्यायुर्दत्तभक्तान्तिके भोः पेयं कर्णैर्दत्तलीलामृतं सत् ॥७९॥

भ्रष्टं ज्ञानं कर्ममार्गो विनष्टो भक्तिः षड्गुर्योगमार्गोऽपि गूढः । शिष्या लुब्धा देशिकाः स्वार्थसारास्तिव्ये त्वेकं तारकं दत्तनाम ॥८०॥

यज्ञानां भो नामयज्ञोऽस्मि पार्थ गीताप्येवं वक्ति नामप्रभावम् । त्यक्त्वा दूरे सर्वमन्यद्ध्यसारं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥८१॥

देयं दानंदीननारायणेषु धेयं शीर्षं भक्तपदाम्बुजेषु । ख्येयो दत्तः साधुवृन्दानुगेषु श्वासे श्वासे दत्तनाम स्मरात्मन् ॥८२॥

मार्गे मार्गे निर्मलं साधुवृन्दं वृन्दे वृन्दे

दत्तनामानुघोषः । घोषे घोषे पातकानां प्रणशो नाह्से नाशे मुक्तिजम्बुप्रसादः ॥८३॥

मार्गे मार्गे वित्तदारानुदासा दासे दासे काञ्चनस्त्रीविवादाः । वादे वादे वर्धते वैरवह्नि र्वह्नै वह्नौ दह्यते स्नेहतन्तुः ॥८४॥

यो यो यद्यात्प्रार्थयेतान्धभक्तस्तस्यास्ते तत्संशयो । नैव चात्र भक्ता भक्तिं कामिनः काममेव लब्ध्वा सौख्यं दुःखमेवानुयन्ति ॥८५॥

मा गा बन्धो दत्तमेकं विहाय ह्यनुत्रात्मन् सौख्यलेशोऽपि नो ते । त्यक्त्वा स्रोतो ध्यायते किं मृगाम्बु श्वासे श्वासे दत्तनाम स्मरात्मन् ॥८६॥

हित्त्वा त्वच्छं मानस कं यथाऽसौ गच्छेत्काकः पल्वलं पापराशिः । मूर्खोऽप्येवं स्वात्मासौख्यं विहाय धावेद्दीनो वित्तदारादिगर्ते ॥८७॥

विद्यादर्पं वित्तगर्वं विहाय प्रह्नो सत्पदाब्जं प्रयाहि । पापान्युक्त्वाऽऽशीःप्रसादं ह्यवाप्य तप्तस्वान्तं दत्तनाम् स्मरात्मन् ॥८८॥

वेदा मूका नेति ब्रुवन्ति देवाः सर्वे दत्तमेवाविशन्ति । शेषो भग्नः का कथा त्वदृशानां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥८९॥

दत्तस्त्वेको मङ्गलं मङ्गलानां दत्तस्त्वेकः सुन्दरः सुन्दराणाम् । दत्तस्त्वेकः कामदः कामादानां श्वासे श्वासे दत्तनाम स्मरात्मन् ॥९०॥

आदौ दत्तो मध्यम एवापि दत्तो दत्ते ह्यन्ते सर्वदा दत्त एव । अन्यत्सर्वं नश्वरं विद्धि लोके श्वासे श्वासे दत्तनाम स्मरात्मन् ॥९१॥

विद्याघ्राद्या दत्तमेव स्तुवन्ति गन्धंर्वाद्या दत्तमेकं गृणन्ति । नागाद्यास्ते दत्त्मेकं नमन्ति श्वासे श्वासे दत्तनाम स्मरात्मन् ॥९२॥

श्रेष्ठो दत्तो दत्त एकः कनिष्ठो भिक्षुर्दत्तः कर्मकारोऽपि दत्तः । बालो दत्तः स्त्री पुमानेष दत्तः सर्वों दत्तं सर्वरूपस्त्वरूपः ॥९३॥

दण्डी दत्तो दत्त एवास्त्यदण्डो मुण्डि दत्तो बद्धमौलिस्तु दत्तः । ज्ञानी दत्तो मुर्खराजोऽपि दत्तः

सर्वो दत्तः सर्वरूपस्त्वरूपः ॥९४॥

चण्डो दत्तः शान्तरूपोऽपि दत्तः पापी दत्तः पुण्यरूपोऽपि दत्तः । चोरो दत्तो दानशूरोऽपि दत्तः सर्वो दत्तः सर्वरूपस्त्वरूपः ॥९५॥

रोगी दत्ते रोगमुक्तोऽपि दत्तो भोगी दत्तो भोगमुक्तोऽपि दत्तः । त्यागी दत्तः संग्रही दत्त एव सर्वो दत्तः सर्वरूपस्त्वरूपः ॥९६॥

रागी दत्तो रागभुक्तोऽपि दत्तः सङ्गी दत्तः सङ्गमुक्तोऽपि दत्तः । वर्णी दत्तो वर्णमुक्तोऽपि दत्तः सर्वो दत्तः सर्वरूपस्त्वरूपः ॥९७॥

राजा दत्तो भिक्षमाणोऽपि दत्तः स्वामी दत्तो दीनदासोऽपि दत्तः । मौनी दत्तो वाग्वदान्योऽपि दत्तः सर्वो दत्तः सर्वरूपस्त्वरूपः ॥९८॥

उत्तिष्ठात्मन मोहनिद्रां जहीहि दत्तं देवं स्वात्मसूर्यं स्तुवीहि । त्यक्त्वा सर्वं तस्य सेवां विधेहि भित्त्वा मायां मायिनं शिघ्रमेहि ॥९९॥

देवो दत्तो मर्त्यजन्माऽपि दत्तस्तिर्यङ् दत्तः

कीटकीटोऽपि दत्तः । स्थाणुर्दत्तो जङ्गमो दत्त एव
सर्वो दत्तः सर्वरूपस्तवरूपः ॥१००॥

मायातीतो बद्धमायो विमायो जन्मातीतो
जन्मदाता त्वजन्मा । कर्ताऽकर्ता जीवनं जीवहर्ता
सर्वो दत्तः सर्वरूपस्त्वरूपः ॥१०१॥

नष्टा वेला प्राप्यते नो पुनः सा क्शीणं चायुः
कालसामीप्यमेव । कण्ठे भूषा भ्रम्यते किं
वृथाऽन्धं श्वासे श्वासे दत्तनाम स्मरात्मन् ॥१०२॥

ज्ञानं भक्तिः कर्मयोगश्च योगः सर्वेऽप्येते दत्तधाम्नि
प्रलीनाः । दत्तस्कन्धे सर्वशाखा मिलन्ति मूलं
तस्माद्दत्तनाम स्मरात्मन् ॥१०३॥

मूलं सिक्ते स्कन्धशाखाश्च तृप्ता धर्मे स्निग्धं
स्वादुजम्बूं ददन्ते । शाखोत्पातं मा प्रसूनं
प्रभङ्ग्धि मूलोत्सेकं त्वाफलं मा जहीहि ॥१०४॥

पायाद्देवो दीनबन्धुः समस्तान् देयान्मुक्तिं
भुक्तिमेवापि मुक्त्यै । सर्वे सौख्यं प्राप्नुवन्तु प्रकृष्टं
दुःखं नाल्पं निर्भयाः सन्तु सर्वे ॥१०५॥

धन्यास्ते ये दत्तमेवानुयन्ति धन्यास्ते ये दत्तमेकं भजन्ति । धन्यास्ते य दत्तमेकं स्तुवन्ति धन्यास्ते ये दत्तमेवाविशन्ति ॥१०६॥

नेत्रे दत्तं पश्यतं प्राणिमात्रे खे श्रूयन्तां दत्तशब्दाः समन्तात् । जिह्वे भद्रे दत्तकीर्तिं स्तुवीहि पादौ बन्धू दत्तपादं प्रयातम् ॥१०७॥

मूढो ' रङ्गो ' रङ्गमायाविबद्धो रङ्गातीतं दत्तमेव प्रपन्नः । रङ्गे रागद्वेषशोकप्रपूर्णे छित्त्वा रङ्गं दत्तरंङ्ग विलीनः ॥१०८॥

॥ इति श्रीदत्तपादारविन्दमिलिन्दब्रह्मचारिपाण्डुरङ्ग ( रङ्ग अवधूत ) महाराज विरचितं दत्तनामस्मरणस्तोत्रं सम्पूर्णम् ॥

***************************

इंदुकोटि स्तोत्रम्

इंदुकोटि तेजकीर्ण सिंधुभक्तवत्सलं ।

नंदनात्रिसूनुदत्त इंदिराक्ष श्रीगुरुं । गंधमाल्य अक्षतादि वृंददेववंदितं । वंदयामि नारसिंह सरस्वतीश पाहि माम् ॥१॥

मायापाश अंधकार छायादूत भास्करं । आयताक्षि पाहि श्रिया वल्लभेश नायकं । सेव्य भक्त वृंदवरद भूयोभूयो नमाम्यहं ॥वंदयामि०॥२॥

चितजादि वर्ग षट्कमत्तवारणांकुशं । तत्त्वासार शोभितात्म दतश्रीयवल्लभं । उत्तमावतारभूतकर्तृभक्तवत्सलं ॥वंदयामि०॥३॥

व्योम आप वायुतेजभूमिकर्तृमीश्वरं । कामक्रोधमोहरहित सोमसूर्यलोचनं । कामितार्तदातृभक्त कामधेनु श्रीगुरुं ॥वंदयामि०॥४॥

पुंडरीक अयताक्ष कुंडलें दूतेजसं । चंडदुरितखंडनार्थ श्रीगुरुं । दंडधारि मंडलीक मौलिमार्तण्डभासिताननं ॥वंदयामि०॥५॥

वेदशास्त्रस्तुत्य पाद आदिमूर्ति श्रीगुरुं ।

नादकलातीत कल्पपाद पादे सेव्ययं ।
सेव्यभक्तवृंदवरद भूयो भूयो नमाम्यहं
॥वंदयामि०॥६॥

अष्टयोगतत्त्वनिष्ठ तुष्टज्ञान वारिधिं ।
कृष्णावेणितीरवारपंचनद्यसंगमं । कष्टदैन्य
दूरभक्त तुष्टकामदायकं ॥वंदयामि०॥७॥

नारसिंह सरस्वतीश नाममष्ट मौक्तिकं । हारकृत्य
शारदेन गंगाधराख्यात्मजं । धारणीक देवदीक्ष
गुरुमूर्ति तोषितं । परमात्मानंदश्रिया
पुत्रपौत्रदायकं ॥वंदयामि०॥८॥

नारसिंह सरस्वती अष्टकंच यः पठेत् ।
घोरसंसारसिंधुतारणाख्य साधनं । सारज्ञान
दीर्घंआयुरारोग्यादि संपदा । चारुवर्ग काम्यलाभ
वारंवार यज्जपेन् ॥वंदयामि०॥९॥

**********************

सर्वसौख्यकरं स्तोत्रम्

यस्य नाम श्रुते सद्यो मृत्युर्दूरात्पलायते ।
दुःखवार्ता विलीयेत दत्तात्रेय नमोऽस्तुते ॥१॥

शोको नंदाय कल्पेत दैन्य दारिद्र्यहेतये ।
रोगःस्वंगाप्तये सम्यग् दिगंबर नमोऽस्तुते ॥२॥

परयंत्रादिकं किञ्चत् प्रभवेन्नैव सूरिषु । कर्ता
कृतेन बघ्येत अवधूत नमोऽस्तुते ॥३॥

कायिकं वाचिकं वाऽपि मानसं वा तथेव च । पापं
तापं च दह्येत कालकाल नमोऽस्तुते ॥४॥

विषबाधा भवेन्नैव भूतादिविप्लवः कुतः । शत्रवो
मित्रतामीयुवैद्यराज नमोऽस्तुते ॥५॥

दुर्बुद्धिः साधुतामेनि शठः शाठ्यं जहात्मरम् ।
पीत्वा यन्नामपीयूषं सिद्धराज नमोऽस्तुते ॥६॥

भयं दिंक्षु प्रधावेत चिंतां चिल्लिमियात् द्रुतम् ।
वैषम्यं विपिनं गच्छेद् योगिराज नमोऽस्तुते ॥७॥

दुःखष्नदुखदावाग्निं ग्रहार्निघ्नं ह्यनुत्तमम् ।
संसारभेषजं सौम्यं मृत्युंजय नमामि तम् ॥८॥

रोगाभिसंकुले देहे निःसारे भेषजे सति । औषधं

नार्मदं वारि दत्तो धन्वंतरिः स्वयम् ॥९॥

भेषजं निष्कलं विद्धि दतमेकं विहाद यत् ।
जन्ममृत्युजराहंतृ दत्तानामामृतं महत् ॥१०॥

य इदं पठति स्तोत्रं ' रंग ' रोगर्तिनाशनम् ।
सर्वसौख्यकरं नृणां सायंकाले विशेषतः ॥११॥

त्रिसप्तं स्वापकाले वा वा मंदवारे सुयंयतः । तस्य रोगभयं नास्ति त्रिः सत्यं नात्र संशयः ॥१२॥

॥ इति श्रीदत्तपादारविंद्रमिलिंदब्रह्मचारि पांडुरंग ( रंग अवधूत ) महाराज विरचितं सर्वसौख्यकरं स्तोत्रं संपूर्णम् ॥

************************

दत्तलहरि

श्रीगणेशायनमः ॥

दलादन ऋषिरुवाच ।

विभुर्नित्यानंदः श्रुतिगणशिरोवेद्यमहिमा यतो

जन्माद्यस्य प्रभवती स मायागुणवतः । सदाधारः सत्यो जयति पुरुषार्थैकफलदः सदा दत्तात्रेयो विहरति मुदा ज्ञानलहरिः ॥१॥

हरीशब्राह्मणः पदकमलपूजां विदधते जगद्रक्षशिक्षाजननकरणे ते ह्यधिकृताः । अभूवन्निंद्राद्या हरिदधिपतां । देवमुनयः परं तत्त्वं प्रापुः शशिदिनकरौ ज्योतिरमलम् ॥२॥

परंज्योतिर्मूर्तें तव रुचिरतेजःकलरवाज्जगद्व्याप्येदानीं तपनशशिताराहुतभुजः । महातेजः पुंजाः सकलजगधाराध्यचरिताश्चरंत्येवं लोकान्नतजनमनोभीष्टफलदाः ॥३॥

भवन्मायारूपं जगदखिलजीवात्मकमिदं भवद्रूपं प्राहुर्निखिलनिगमांतश्रुतिचयाः । त्वया सृष्टं चांदौ हृतमवितमेतत्तदधुना प्रभावं ते वेत्तुं प्रभवति जनः कोऽवनितले ॥४॥

कृपासिंधो तावज्जनुरजननस्याप्य कथिते जगद्रक्षादीक्षा भवति खलु नो चेत्कथमिदम् ।

अनीहस्याऽकर्तुस्तव जगति कर्मोपकृतये
प्रमाणीकर्तुं वा स्वकृतनिगमार्थानिति मतिः ॥५॥

महाविद्यारूपे भगवति निबद्धत्वमुचित्तं हृदा
वाचाऽगम्ये परमपि विमुह्यंति कवयः ।
अविद्यातीतः किं यदि गुणविहीनोऽपि
गुणवानविद्यायुक्तोऽयं त्विति वदति
मायामुपितधीः ॥६॥

भवानादौ यादोनरमृगमुखगोश्वादिकतनूर्विधत्ते
लोकानामवनकृतिहेतोरनुयुगम् । विशुद्धस्त्वं
लीलानरवपुरिदानीमटसि गां पवित्रीकर्तुं वा
परिजननिवासांगणतलम् ॥७॥

जगद्रकषार्थं वा विचरसि
जगत्यात्मजनतापरित्राणायाद्यः
परमपुरुषोऽगम्यचरितः । मृपालोको लोको वदति
मनुजत्वं तदधुना यथा श्रीकृष्णत्वं यदुपुब्रुवते
मूढमतयः ॥८॥

महायोगाधीशैरविदितमहायोगचतुरं कथं जानंति
त्वां कुटिलमतयो मादृशजनाः । तथापि त्वां जाने

तव पदयुगांभोजभजनान्न
चेत्त्वत्पादाब्जस्मृतिविषयवाणी कथमभूत् ॥९॥

अपारे संसारे सुतहितकलत्रादिभरणाद्युपाधौ
मग्नास्तत्तरणकरणो पायरहिताः । पतंति
त्वत्पादाम्बुजयुगलसेवासु विमुखा नराः
पापात्मानः प्रवरनरके शोकनिलये ॥१०॥

सुधासिंधौ द्वीपे कनकलतिके कल्पकवने
वितानैर्मुक्ताढ्यैर्नवमणिमये मण्डपवरे ।
अशेषैर्माणिक्यैः खचितहरिपीठेऽब्जकुहरे
हुताशारे ध्यायेत्तव परमपूर्ति निखिलदाम् ॥११॥

धराधाराधारे हुतवहपूरेधीशगणपं विधिं श्रीशेषौ
वानलपवनव्योमानि हृदये । युतौ
जीवात्मानाधधिकमवमत्या प्रविशते विधत्ते
जायास्त्वं परकलितवामेन वपुषा ॥१२॥

सहस्रारे नीरेरुहि सकलशीतांशुललिते सहंसे हंस
यः स्फुटमपि भवन्तं कलयते । सुषुम्णावर्तिन्यां
तव चरणपीठेंदुसुधयाऽप्लुतो भित्वा
ग्रंथित्रयममृतरूपो विचरति ॥१३॥

तवाधारे शक्तिस्थितकमलकर्माद्यभिवृते महापीठे
वैश्वानरपुरमरुद्देहनिलये । धराव्योमाकल्पे
सुरमुनिमहेंद्राद्यभिनुतं महातेजोराशिं निगमानिलयं
नौभि हृदये ॥१४॥

भवत्पादांभोजं भवजलधिपोतं भजति यो
महासंसाराब्धिं तरतितरतित्येव निगमः । इहामुत्र
त्रातुं तव चरणामेवात्मशरणं भजे
भीतश्चाहकृंतिपरमनस्कोऽयमधुना ॥१५॥

यथा दारुष्वग्निर्निवसति तथा देहनिकरे प्रविश्य
त्वं चैको बहुविध इवाभासि तु तथा । चलन्नीरे
चंद्रः शतविध इवाभाति गुणतो न चैतच्चंद्रे स्यान्न
शतविधता नापि चपलम् ॥१६॥

दरिद्रो वा मूढः कठिनहृदयो वापि भवतां दयापात्रं
स्याच्चेद्व्रजति महातामप्यधिकताम् । न विद्या
रूपं वा न कुलमपि वा कारणमभून्महत्त्वे सेवैका
तव पदयुगांभोजकलना ॥१७॥

न कारुण्यं स्यात्सकलगुणवानप्यगुणवान्
भवत्कारुण्यं स्यादगुणगणपो वोरुगुणवान् । यथा

पत्यौ रक्ते यदपि च विरक्तै च युवतौ वृथा सौंदर्यं
स्यात्सकलमपि तेऽनुग्रहवाशात् ॥१८॥

अनाथे दीने मव्यधिगतभवत्पादशरणे
शरण्यब्रह्मण्यप्रथितगुणसिंधो कुरु दयाम् ।
महातेजोवार्धे स्वसुकृतमहिन्नैव सततं पुरा
पुण्यैहीनं पुरुषमुपकुर्वन्ति कृतिनः ॥१९॥

महाश्वेतद्वीपेऽभरतरुणात्यंतरुचिरे मणेः
पीठांभोजेऽनलशशिखगांतर्निवसितम् ।
गदाचक्राजासिप्रसृतकरपद्मं मुररिपुं स धन्यस्त्वां
ध्यायेत्परचिदानंदवपुषम् ॥२०॥

लसन्मेरोः शृंगे सुरमणिमये कल्पतरु - प्रकीर्णे
वाक्पीठे रविशशिकरा - कीर्णजलजे । स्थितं
वाचाधीशैर्नुतमनुदिनं त्वां भजति यो
भवेद्वाणिशानामपि गुरुरजेयोऽवनितले ॥२१॥

समुद्यद्भलार्काय - युतनिभशरीरं मुनिवरं स्थितं
बीजे मारे त्रिदशपतिगोपातिरुचिरे । हृदि त्वां यः
पश्यन् सुखकरमिति ध्यायति सदा स एवाहं नूनं
स भवति जगन्मोहकरः ॥२२॥

निधिर्विश्वेषां त्वं निजचरणपद्मद्वयवर्ता
शरण्यश्चार्तानां चकितहृदया - नामभयदः । वरेण्यः
साधूनां वरद इति वा कामितधियां भवत्सेवा जंतोः
सुरतरुसमाना नु फलति ॥२३॥

यथा वै पांचाली नटति कुहकेच्छानुशरणं कुलालेन
भ्रांतं भ्रमति च सकृच्चक्रमनिशम् । तथा विश्वं सर्वं
वियति मनवश्चानुगुणिताः स्वतंत्रः को वास्ते वद
परसुरेशस्त्रिभुवने ॥२४॥

त्वयाज्ञप्तो धाता सृजति जगदीशोऽपि हरते हतिः
पुष्णातीदं तपति तपनो याति पवनः । धरां
साद्रिद्विपां वहति भुजगानामधिपतिः सुराः सर्वे
युष्मद्भवपरवशाद्बिभ्रति बलिम् ॥२५॥

स्वयं मुक्तेः पूर्व स्वकृतसुकृतं मां नयति
चेद्भवासत्त्वं का वा तर व चरणपंकेरुहरतिः ।
हरेत्पापौद्यं नः शुभमपि ददातीति च सदा
भवंत्याशाबद्धाःसकलमपि धातुर्वशमहो ॥२६॥

प्रधानं वा कर्म स्थितिविलयसर्गेऽलमिति
चेज्जडत्वात्क्षीणत्वात्कथुमुचितमेतन्निगदितुम् ।

तयोरीशोऽनीशे भवति
जगदुत्पत्तिविलयावनान्यासन् ब्रह्मान्निति वदति
शास्त्रं श्रुतिरपि ॥२७॥

भवत्सेवा जंतोर्भवदबहुताशांवुदनिभा
महामोहध्वांतप्रतिहतमतेर्दीपकलिका ।
सुधावर्षिण्येषा विहित मनसां
निर्ममनृणामुपाध्याये ब्रह्मप्रवचनविधानेऽतिचतुरा
॥२८॥

अवज्ञायै लोके बहुपरिचितिः प्राकृतमतिर्निरस्यापो
गंगाःप्रसरति यथा नाल्पतटिनीम् विशुद्ध्यर्थं तत्त्वं
सकलपुरुषार्थैकफलदं भवंतं हित्वान्यं भजति
गुरुमाशापरवशः ॥२९॥

निमील्याक्षिद्वंद्वं निगमनिरतो निश्चलमनाः
प्रकाशंतंदृष्ट्या त्रिभुवनमुदं ज्ञानपरया ।
ललाटेऽधोमुख्या रसजनित - दिव्यांजनधरं
स्मरेद्यस्त्वां योगी भवति निधिसिद्धेरधिपतिः
॥३०॥

महामायामंत्राक्षर - कमलपद्मासनयुतं
महानीलच्छायं मधुमुदित - योगिन्यभिवृतम् ।
दधानं सद्बोधासितकनकगोक्षीरतिलकं मुने यस्त्वां
पश्येद्भवति सकलादृश्यकतनुः ॥३१॥

सुधाधारे हेतौ सकलजागतां स्वर्णकलिते
सितांभोजे तेजोधिकतपनबिभ्रन्श्रुति तनुम् ।
मणिप्रोते पीठे निखिल - सुरवृन्दैः परिवृते स्थितं
त्वामारोग्यं स्मरति हृदि तस्यामृतमयम् ॥३२॥

परत्रादाता चेद्भवति न ददात्यैहिकसुखं
ददात्येत्सौख्यं वितरति न चामुष्मिकसुखम् ।
भवत्सेवा जंतोरिह परसुखप्राभयकरी
सुराणामन्येषामनुसरणमात्मैक्यमकरोत् ॥३३॥

जटी वल्की क्कापि क्कचिदपि सुभूषांबरभृती
क्ककिद्भूत्यालिप्तः क्कचिदपि सुगंधांकिततनुः ।
क्कचिद्योगी भोगी क्कचिदपि विरागी विहरसे
बहुज्ञानी ज्ञातुं तव गतिमशक्ताश्च मुनयः ॥३४॥

विशुद्धं चैतन्यं क्कचन जडवत्क्वापि
सकलागमज्ञोऽप्यज्ञस्याद्विहरसि कदाचिद्बहुविधः

। ऋषिभ्यस्त्वं तत्त्वं परममुपदेष्टासि विततं चरित्रं
ते वेत्तुं चतुराधिकवक्त्रा न चतुराः ॥३५॥

मणिर्वा मंत्रो वा विविधविमलैश्वर्यमपि वा
महायोगोऽष्टांगाभ्यसनविहितो वा त्रिभुवनम् ।
समर्थं चैकैकं प्रभवति वशीकर्तुमधिकं स्थितं
त्वय्येवेदं तव किमुत लोकैकवशता ॥३६॥

सरस्वत्याधारीस्यतमरुदतिप्रेरितपरां नृपो धारां
भित्त्वा रसकमलवासाधिपपुरी । परं तेजोरूपं
सकलभुवनालोकनिरतो भवं ते
संयोगात्परमसमवेतं मुनिपतिः ॥३७॥

अपतत्त्वं हंसं सकनभवदेवे जलरुहे
तडिद्भास्वद्दीप्तिप्रकटदलषट्के सुललिते । परं
स्वाधिष्ठाने रुचिरतररूपं निरूपमं स्थितं ध्यायेत्त्वां
यो मदनसमरूपो विजयते ॥३८॥

परीतं त्वां विष्णो हुतवहनमायाविलसिते सरोजे
नीलाभे मणिरचितपीठे मणिगृहे ।
महासिद्धैःकल्पद्रुमवरतले स्वर्णनिचयात्प्रवर्षद्भिः
सस्यात्परमतनुभूतिः स्मरति यः ॥३९॥

मरुत्ताराप्राभेकनकरुचिपद्मे श्रुतिमयं प्रभुं
लोकातीतं निखिल - निगमावेद्यचरितम् । भजंते
ये त्वां ते सुदृढतरतादात्म्यकदृशां चिदानन्दं
मायागुणविरहितं यांति परमम् ॥४०॥

सुधाशुद्धे व्योम्नि द्रुहिणरमणी - बीजलसिते
विशुद्धांभोजांते सुरनर खगाद्यंतरहितम् । भवंतं
भावोत्थैः कुसुममुखपूजोपकरणैः समर्हंल्लोके ना
द्वितयपरमं ब्रह्म भजते ॥४१॥

तडिल्लेखाशोचिर्द्विदलकमले भाति परमो
महामुक्तानंगोनलशशिदृशोक्षीणि भवते ।
अशेषस्तोत्रेषु द्विरसजलवानंगकनकः
श्रुतिप्राणोष्टांगप्रगुणित - कलापीठनिलयः ॥४२॥

क्वचिगुह्यं जिव्हा क्व च गुदकमन्यत्र कविता
क्वचिद्वागन्यत्र श्रुतिरपरतो लोचनयुगम् ।
समाकर्षंन्त्यात्मानमिव बहुभार्याः प्रलुभिता ततो
ध्यातुं स्थातुं कथमपि न सक्तास्तव पदम् ॥४३॥

अशक्तोऽहं स्नातुं क्षणमपि जपं कर्तुमपि वौ -
दनाभावावादेवातिथिजनसपर्या च न कृता । कुतो

ज्ञानं ध्यानं त्वकृतगुरुदेवस्य मम भो भवेदेवैकाशा वसति तव भक्तत्वजनिता ॥४४॥

अमंदे मंदारदुमचरसमीपे मणिमये सुखासीनं पीठे सुरवरमुनेंद्रादिविनुतम् । स्वहृत्पद्मे वापि स्थितमनुदिनं त्वां भजति यः स चेहामुष्मिन्वा सकलजनपूज्यश्च भवति ॥४५॥

तृणं मेरु कुर्यात्सुरवरगिरिं वापि च तृणं भवत्सामर्थ्यं वाऽघटितघटनाप्रौढिमतनो । इदं जाने तस्मै पुनरपि न जानंति कवयोऽप्यहो युष्मन्माया सकलजनमोहोन्मदकरी ॥४६॥

नटो भूयो बैषैर्बहुविधि इवाभाति सगुणो यथैको वाकाशो घटमठगुहास्वंतरगतः । यथैकं गांगेयं कटकमुकुटाद्याकृतिवशात्तथा दत्तात्रेय त्वमपि बहुरूपस्त्रिभुवनम् ॥४७॥

सहस्रांशुप्राभे सुरतरुसमाढ्येऽधिकतरे विमाने हंसाख्ये स्थितममृतनीहारवपुषम् । परीतं त्वां ध्यायेद्यदरजसमारूढम - निलैरशेषैराज्ञायां भवति खचरो व्योमगमनैः ॥४८॥

स्थितं मूलाधारे कनकरुचिराङ्गं हुतभुजः
शिखाभिः प्रख्याभिः वृतमाखिलतेजोरसघटम् ।
धरन्तं भ्रूमध्ये प्रसृतनयनः पश्यति च यः परं त्वां
सत्यं स्यादखिलरसविद्यातिनिपुणः ॥४९॥

शिरप्रान्तभ्रांतायतकुटिल बालार्कमतुलं प्रदीप्त -
स्वर्णाढ्यारुणशतलसत्कुण्डलधरम् । मरुत्पुत्रं
लङ्काधिपतनुजनाशोद्यतकरं स्मरेद्यस्त्वां
यत्नात्सकलभयभूतापहरणे ॥५०॥

गरुत्मन्तं चञ्चच्चलकनक - पक्षद्वययुतं
सुधाकुम्भोद्भास्वत्करमखिललोकाभिगमनम् ।
अचिन्त्यं वेदैस्त्वां परममुनितार्थ स्मरतियः स
दक्षोऽसौ वादी कपटविषजन्तुप्रहरणे ॥५१॥

स्मृतिं नंदंतं यो मनुजमुपतिष्ठंत्यतिबलात्कृताशा
मिथ्याद्यात्पणतजनमन्दार भवता । अदत्ते
दत्तत्वादमलतरचिद्रम्यविभवात्सदा दत्तात्रेयो
भजसि भजतामिष्टफलदः ॥५२॥

विधिं विष्णुं भायां शृणिमदनयोनिं दिनकरं

मिलित्वानङ्गेनानलवयुवतियुक्तां जपति यः ।
त्वदाख्यामाख्येयां निखिलानिगमाढ्यामखिलदां
स संपद्भिर्देवाधिपविभवयुक्तो विहरति ॥५३॥

परा माया वाणी मदनकमलाबीजसहितं मनु
प्रत्येकं ते जपति सततं निश्चलधिया ।
यतामेत्यैश्वर्याश्रुतसकलविद्यानिपुणतां वशित्वं
ब्रह्मैक्यं स्वपदि यदि यायात्परमुने ॥५४॥

अविज्ञातं किञ्चित्तव जगति नास्ति प्रभवितुस्तदा
विज्ञातोऽहं यदपि सकलज्ञेन भवता । अदृष्टं
मन्येऽहं प्रतिभटमविज्ञानकरणे मुने दत्तात्रेय प्रकुरु
मयि कारुण्यमतुलम् ॥५५॥

भवत्पादांभोजद्वयशुभरसास्वादचतुरं
भ्रमद्भृङ्गीशंखायितहृदयवृत्तिं कलय माम् ।
अनाधाराधाराश्रितसुरतरो तावकजने मुने
कारुण्याब्धे प्रकुरु मयि संपत्प्रकटनम् ॥५६॥

वदंत्येकेऽ पार्थ तव गतिमनेकार्थहरिणीमजानंतो
ज्ञेयामनधिगततत्त्वार्थमतयः । महायोगिं ल्लोके
जडमतिकृते त्वं धृतवपुस्तथा नो

चेद्भक्तास्वजनपरिरक्षा कथमहो ॥५७॥

स्मृतस्त्वच्छिष्यो वा जगति कृतवीर्यस्य तनयोऽर्जुनो राजा चोराद्भयमहिभयं वृश्चिकभयं । हिनस्त्याजौ शत्रूदितमपि भयं चेति गदितं भवेयुत्स्वच्छीष्याः किमुत हृतचोराधिकभयाः ॥५८॥

पदानां सेव्यो वा न भवसि यदा किञ्चन नृणां प्रियः साधूनां त्वं तव च सुहृदस्तोपि सुजनाः । मयि त्वार्थे दीने जननमरणाद्येः कुरु दयां दयावान्को वा मे भ्रमनिगडनिर्मोचनविधौ ॥५९॥

यथा माता पत्रं सकलगुणहीनं च कुटिलं प्रपुष्णात्यन्नादयिरनुदितमतावादरहिता । तथा त्वं लोकानां मम च पितरावित्यभिमतं ततस्त्रातुं दातुं फलमाभिमतं चार्हसि विभो ॥६०॥

जडं वाचाधीशं सुधियमपि मूक च कुरुषे खेर्वा शीतत्त्वं यदि च कुरुषे दृष्टिवसतेः । अकर्तुं कर्तुं वान्यदपि परिकर्तुं च मनुजस्तदा सर्वं कुर्याः क्वचन किमसाध्यं त्रिभुवने ॥६१॥

पुमान्यो वै युष्मत् - चरणपरिचर्याकृतिपरो महालापास्थानाशनशयनपानानि कुरुते । स वै धन्यो लोके सकलजगदाराध्यगरिमा अहो भाग्यं तस्यागणितयशसः कोऽपि न भजेत् ॥६२॥

प्रसादात्ते यस्मिन्प्रबलतरदारिद्र्यविभवः स यायादिंद्रत्वं सकलसुरनारीपरिवृतः । तवोपेक्षा यस्मिन्भवति स सुराणामधिपतिः परत्र ह्यत्यंतं प्रविहतमहैश्वर्यविभवः ॥६३॥

सदा मंत्रैर्जाप्यः पुनरपि मनूनेव जपति स्वयं तंत्रध्येयो यदपि कुरुते तंत्रनिचयम् । सदा ब्रह्मानंदामृतजलधिकेलीकलितधीः स भतेर्भूयस्या भवतु भगवन्नः कुरु दयाम् ॥६४॥

तुरीयाग्निश्वेतद्युतिदिन कृदकैर्मुनिपतेर्महाविद्याखंडैः परियुत - महानष्टुभमनो । चतुर्भिश्चक्राब्जां कुशगणधरं सामि युवतिं नृसिंह त्वद्रूप भजति सपुमर्थैकनिलयः ॥६५॥

मुने ते माणिक्यप्रवरखचिते हेममुकुटे पुरा
कल्पध्वंसे परिकलितसूर्यापररुचः ।
वसंत्त्यस्मिन्नूनं नहि यदि तदा भूतमुनयो न विद्यन्ते
लोकाः प्रखरतिमिरांतैकचतुराः ॥६६॥

अहो योगिन्नानामणिखचितभावात्तमुकटः
शिखाग्रालंबिन्यास्त्रिकतलमसौ रत्न - शिखरात् ।
महामेरोलीलांकलयति सदा यामकलितां
शरत्सौदामिन्याः कटकवरतेजोमयतनोः ॥६७॥

सुविज्ञातं लोकैरनवधिसदादेशनपरैः सुधाखंडं
लब्ध्वा तव नबिडभावांधकमरनम् । द्वितीयं
सोमेंदुस्फुटमुकुटः कांटमनघं महामूर्तिजोत्स्ना
हरति नतदारिद्यतिमिरम् ॥६८॥

धृतं पुंड्रं मात्रात्रितयरुचिरं साक्षरमिदं सहस्रारे
हंसैः स्थितपरमहंसाजिगमिषोः । वहंती
पादाब्जद्वयसरललाक्षारस पदं परा
शक्तेश्चंद्रोपलरचितसोपानपदवी ॥६९॥

श्रेयेते हैमंते तरुविमलपत्रे मधुकरौ शुभं गर्मांभोजे
स्थिमिति सुचित्रं शमनिधे ।

कठोरेंदुप्रांशुप्रवरनिकरीभूततिमिरं
सुधांशुर्भावात्को मुकुलयति विद्युत्कुवलयम्
॥७०॥

तमोभिर्भूकालीगृहमिदनुज्जृंभितामिति त्वदीये
नेत्राब्जे कमलसदना जृंभितवती ।
सदासुज्ञानेनाविशति सदयाक्षि प्रसरति प्रभो
यस्मिन्स्याते ध्रुवमतिधनोऽयं मुनिपते ॥७१॥

यदा योगिन्नी - षद्वलिरविलसत्कारकदृशोरूपांत
नीलाली उदरयुगुली कंजदलयोः । वरं कारायेते
कनकमकरीकुंडलयुगे कटाक्षौ
चांपेयस्तबकविचरंताविव वरौ ॥७२॥

त्रयीविद्यारूपस्त्रितनुरहिमांशुः प्रतिदिनं श्रुती
भावत्केचिद्द्वविधमकरीकुंडलापदः ।
मिलित्वात्मायं ते घनतरनुपाधिद्वयमपि व्यनक्ति
श्रीकारं निखिलजगदुद्दीपकमुने ॥७३॥

कपोलौ यैष्माकौ स्फुटमुकुटबिंबप्रतिभटौ भृशं
संघर्षित्वात्प्रतिदिनसमारोपितरुचौ । निजा
कांतिर्निंत्या कनकनिकषोऽत्यंतमहिमा त्वदीयो

नीचैव प्रचुरतरकांतिस्तव मुने ॥७४॥

मुखेंदुं दृष्ट्वा ते यदि विशति राहुप्रतिभयात् शशी वक्रं प्राप्य द्विगुणितकलानां निधिरभूत् । द्विजानां राजत्वं प्रकटितमेत दत्तशरणी - बलेनाहो स्वामिन् कथमपि च लभ्यो हि महिमा ॥७५॥

तवायं बिंबोष्ठश्चिवुकसहितो विद्रुमलतासमाक्षिप्ता तिर्यग्यदि बहुपदं स्यात्फलयुगम् । व्रजे तत्साम्य तन्निहितमुत वा पल्लवदलं यदि स्यात्ते नारस्तु - लयतिमहो संयमिपते ॥७६॥

भवद्वाणिश्रेणीं श्रवणपुटसौख्यप्रकरणीं विजेतुं वाक् श्रुत्वा स्वयमुत विदित्त्वाऽहमितिभाक् । अशक्तां तेत्यतं फणिललितजिव्हाग्रविषतः प्रविष्टा वक्रांतं सितमणिलसद्विद्रुमगृहम् ॥७७॥

तवावृत्ता
रेखात्रयविलसिताकंबरभवच्छराणामाधारः कथम - भवदेतन्न यदि चेत् । अथेमामूदेहात्विहं कविहराद्याकृतिधरां तदा नो चेद्वेदत्रितयकलितां वापि गणये ॥७८॥

महानन्तश्चासीद्विष घरवरो वासुकिरस निबर्हंतौ
मर्त्याधिकभयकरत्त्वं गणयताम् । भुजाकारौ
स्वीयौ तव तु भुजसत्त्वं विदधतां मुने भूतौ स्निग्धौ
सपदि वरदौ चाभयकरौ ॥७९॥

मुने गङ्गस्रोतोमरखगिरिप्रस्थफलके प्रसादे
स्वर्णाढ्ये प्रभवभव - दुद्भागलुलितम् । त्रिसूत्रं
सुस्निग्धं धवलमुपवीतं कलयते महायोगि -
न्मूर्तित्रयमपि विलीनं तदथवा ॥८०॥

प्रसिद्धस्वर्णाद्रिर्दिवि विबुधवाचा - वितरणात् ।
प्रशस्तौ ते हस्तावखिलपुरुषार्थप्रकरणात् ।
जनानां पादाब्ज - द्वितयमधिकं प्रेम भजतां मुनींद
त्रैलोक्याद्भुतगणमणिक्षीरजलधे ॥८१॥

इयं रोम्णां राजिर्विलसति महानाभिसरसः प्रवृत्ता
कुल्येव प्रतिपतित - भंग्यस्त्रिवलयः ।
नवालेखालोकत्रयविभाजनार्थे विरचिता मुने
दत्तात्रेय त्वदुदरविलग्ना विलिसिताः ॥८२॥

ध्रुवं शं मा मौञ्जीत्रितयव - लिरेखावरतनो रुरुक्षोः

प्रासादं स्वशयहृदयाख्यं तव हरे । महालक्ष्म्य -
श्चचत्कनकमयसोपानपदवी न चेन्नाभीकुण्डे
पुरिचिदुपलब्धा परिदया ॥८३॥

प्रवृत्तावूरु ते लसदुदरलोकव्रजधृतिर्धृता सा
कवींन्द्रस्फुटपटुकटौ सप्रकटितौ । कटौ विस्तारौ
यत्कटकफलकौ ताविव मुने महायोगिन्विश्वम्भर
इति च नून त्वमधिसूः ॥८४॥

कृपालो विश्वेश त्रिभुवनतले ते प्रमितितो
दिवारात्रौ स्थानं मिलति वपुषो जानुयुगलम् ।
अभक्तानित्ये - तत्कथितमभियुक्तैः समतनोः
प्रदुब्यन्ते संप्रत्यपि तदिदमर्थं हि सुदृढम् ॥८५॥

जगन्मूलं सृष्ट्वा सकलजगतां सर्वकुशलो
भवज्जंघे लक्ष्मीकृदसमसरस्यः प्रकुरुते । प्रकृष्टौ
तौ वीरौ भ्रमयित - विलक्ष्योऽल्पगुणवान् मुने ते
नानङ्गस्तव तुं विमुखो लक्षणवतः ॥८६॥

नाराणां नानार्थप्रदरसगुटित्वं च दधतौ मुने गुल्फौ
गूढौ तव चरणपुष्टौ प्रकटिती । घटावृत्तिर्नार्योरिव
सकलकौ वृत्तरुचिरौ विराजेते

तेजोनिकरकालितायां सुवपुषा ॥८७॥

मदाधारं युष्मत्प्रपदमतिपूज्यं सुरुचिरं धुवात्मानं
मत्त्वा जितमिति सदा कच्छपपतिः । विवेशादौ
भूमेर्यादि तदिदमेकं स्मयकरं त्विदानीं
तज्जातिर्मुकु - लितशिराश्चाभवदहो ॥८८॥

मया दत्तं किंचिन्न यदि कलितं वासवमहं तदा
रोच्व्जातं जननमपि पंकप्रकटिनम् ।
प्रविश्येत्यायोज्य न चलति ह यत्तत्वदभिया पदं ते
तु श्रीदं सकलसमये श्रीनिलयनम् ॥८९॥

मुने ते पादाब्जं नवममृतपादोद्भवमहो श्रितः
सौन्दर्यं तत्पशुपतिशिरोब्जं हिमकरः । निवृत्तं
स्वास्याङ्कं भजति भवदेकात्मपुरुषः कथं
ब्रह्मागारे परमपुरुषानांघ्रिभजनाः ॥९०॥

न चित्रं ते पादौ वितरत इति प्रार्थितफलं विधिं
श्रीशं रक्षाकलुषविषदं दृश्यमतुलम् । स्मरान्तः
श्रीगङ्गाधरचरणशंखाम्बुजसुरद्रुमाश्चतद्भावानतज
न ॥९१॥

त्रिखण्डैः श्रीविद्यामनुवरभवैर्भावकरिपो विवृद्धस्ते
मंत्रो विषवदति यो ज्योतिरमलम् ।
षडर्णाचंद्रार्कप्रकररुचि तन्मे प्रभवतां सदा
ज्ञानानन्दं युवतिनृमयं लोचन - पदम् ॥९२॥

समुन्मीलद्भानुप्रकररुचिवाग्बीजममलं
मरुत्वद्गोपाभां मदनलिपिमाधारकमले । हृदब्जे
शक्त्याख्यं सितकरकराभं शिरसिजे सरोजे त्वां
ध्यायेत्सकलपुरुषार्थान् स भलते ॥९३॥

चिदंशत्वाद्रूपं किमपि सवितुर्मण्डलगतं वरेण्यं
भर्गो वै त्रिविधतनुदेवस्य वपुषि । मुने
धीमह्मासद्भिरिरपि धियो यो न
इतरत्प्रचोदायास्तत्त्वं स्थितिलयसृजस्वं मुनिपते
॥९४॥

हरिस्ततुः प्रोतः सदसि शिखरे शुभ्रकपटो
जगन्मूलस्थाणुस्त्वमिति शुभमस्पंदमुनिमिभिः ।
ज्वरीभिः स्वर्णाढ्यः
पवनहततद्बिन्दुकनिरैर्जरासक्ताब्जाहीरुचिरमभिष
स्थित इव ॥९५॥

दुराचारो जारश्चपलमतिराजः परवशः
परद्रव्याकांक्षी बहुजनविरोधी च सततम् । तदा
चाहं पुतस्तव पदयुगे स्पर्शवशतो ह्ययः खण्डः
स्वर्ण भवति हि यदा सिद्धसुरतिः ॥९६॥

परिक्रान्ता देशा बहुतरधनस्यार्जनधिया कुलाचारं
हित्वा कुमतिनृपसेवापि च कृता । विधायासौ
श्रांतः किमपि न च लब्धं तु वपुषाश्रितं
त्वत्पादाब्जं श्रितमनुजमन्दारमधुना ॥९७॥

त्वदीयो मे देहस्त्वमपि पितरौ भ्रातृसुहृदस्त्वमेव
ब्रह्मन्मेव सुतहितगृहक्षेत्रनिवहाः । त्वमेव प्राणो मे
धनमपि ममत्वात्तव पदं न जाने मय्येव
स्थिततरमुहुर्मीयमधुना ॥९८॥

नमस्ते तारायामृतजलधिधाम्नेऽधिमहसे नमस्ते
ब्रह्माद्यैर्मुनिसुरवरैः क्लृप्तमनसे । नमस्ते
यन्नारायणमुनिविलासाय भवते मनूनां
कोटीनामचलगणितानां च पतये ॥९९॥

नमस्ते देवैरप्यविदितमहिम्नेऽतिय शसे नमस्ते
दिक्पाल - प्रकटमुकुटालंकृतपदे । नमस्ते

तेजस्विन्नमनुजमन्दारवपुषे नमो दत्तात्रेयाकृति - हरिहराजाय महते ॥१००॥

नमस्ते पापौघाचलवितति - संहारपतये नमस्ते दारिद्र्यव्यथितजनदैवांवनिलये नमस्ते रोगार्तनमनुज - दिव्यौषधिदृशे नमस्ते दैवं मे नहि नहि जगत्यां तव पदम् ॥१०१॥

असौ दत्तात्रेयस्तुतियुतकृतिर्ज्ञानलहरी
सुधाधारापूराखिलनिगमसारानुपठताम् ।
श्रुतश्रीविद्यायुर्विभवधनधान्यामृतचयं
ददात्येवात्यन्तं जयति सकलाल्हादजनिका
॥१०२॥

॥ इति श्रीदत्तात्रेयज्ञानलहरी - दलादनमुनिविरचिता श्रीदत्तपदप्रापिका सम्पूर्णा ॥

**************************

ओव्या

याकारणें ईश्वरें पाहे । पार्वतीस बोध केला आहे । पारंपार मार्ग चालिला आहे गुरुसेवा सुदुर्लभ ॥१४॥

विधाता आदि करूनि समस्त वंदिती याचिगुणीं । जो जाहला अंतर - मनोन्मनी । तोचि श्रेष्ठ सकळिकां ॥१५॥

गुरुसेवा अनंत सुख । दूर होय समस्त दुःख । तोचि धन्य नर एक । या क्षितीवरी ॥१६॥

वशिष्ठ वाल्मीक जनकादिक । समस्त नाव पावले गुरुसेवें निक । तुम्ही शहाणे चतुर विवेक । भजा भजा ही श्रीगुरूसी ॥१७॥

सद्‌गुरूसी भजतां सद्भावेंसी । सद्गति होईल तुम्हां भरंवसीं । याकरणे स्थिरमनेसीं । शरण रिघावें श्रीगुरुमूर्तीस ॥१८॥

गुरुमूर्तीसि संतोष होतां । त्रयमूर्ति तुष्टती तत्त्वता । वेदशास्त्रीं असे संमता । पारंपर गुरुमार्ग हा ॥१९॥

पूर्वी युगायुगीं पाहें । आयुष्य फार नरदेहा । अनेक तप करिती सायास पाहे । मुक्ति होत त्या नरांसी ॥२०॥

आतां वर्तला कली प्रबळ । वेदमार्ग राहिला सकळ । जन जाहले मूढ केवळ । ज्ञानहीन पशूपरी ॥२१॥

या कलियुगामाझारीं । ज्ञानी जाहले मूढापई । कांही नेणती अंधबधिरीं । मायापाशे वेष्टोनियां ॥२२॥

याकारणें तुम्हीं विद्वज्जन । ‘ गुरुभाव ’ धरा स्थिरमनें । तुमचें तुटेल भवबंधन । श्रीगुरुराजप्रसादें ॥२३॥

लाधे ज्यासी गुरुप्रसाद । त्यासी प्रपत होय कैवल्यपद । दूरी होईल कामक्रोधमद । साध्य होईल पद - अच्युत ॥२४॥

अवतार याकारणें । घेतला असे नारायणें । साधुजन उद्धरावयाकारणें । अवतरले कैयुगीं

श्रीगुरुमूर्ति ॥२५॥

भूमिभार उतरावया । जन्म धरिला श्रीपादराया । दत्तात्रेय - आवधूतरायें । वेष धरिला नर देहीं ॥२६॥

देह धरूनि श्रीगुरुमूर्ति समस्त उद्धरिले जडमति । अवतरले आणि लक्ष्मीपति । केवळ सात्त्विक रूपानें ॥२७॥

जे जे असती भाविक जन । त्यांसी उद्धरी आपण । बळात्कारें जाई त्यांचिया भुवना । श्रीसद्गुरुराजयोगी ॥२८॥

आतां असो हें युक्तीचें कथन । भावें धरा हो सद्गुरुभजन । हातां चढेल उमारमण । श्रीगुरुप्रसादें ॥२९॥

श्रीगुरुप्रसाद लाधे ज्यासी । त्यासी साध्य व्योमकेशी । निवारण करी मोहपाशासी । मग रहाल शाश्वत पदीं ॥३०॥

संसार म्हणिजे भवसमुद्र । यासी करावा निःशेष

भद्र । बळकट धरावी भाव मुद्रा । मग पावाल पैलपार ॥३१॥

गुरुभक्ति म्हणिजे कामधेनु । कल्पिलें होय मनकामनु । न धरावा मनीं तुम्ही अनुमानु । शरण रिघावें श्रीगुरुमूर्तीसी ॥३२॥

प्रसन्न होतां श्रीगुरु जाण । बाधों न शके यम आपण । जरी असेल पापक्षोण । लय होईल भरंवसें ॥३३॥

संपर्क होतां अग्नीसी । तृणबणवी होय भस्मसुरसी । तैशा तुमच्या सकळ पापराशी । निःशेष जातील परियेसा ॥३४॥

इति श्रीगुरुचरित्रामृते परमकथाकल्पतरौ श्रीनृसिंहसरस्वत्युपाख्याने सिद्धनामधारकसंवादे सरस्वतीगंगाधरविरचिते गुरुगीतावर्णनं नाम एकोनपंचाशत्तमोऽध्यायः ॥४९॥

श्रीगुरुदत्तात्रेयार्पणमस्तु ॥ श्रीगुरुदेवदत्त ॥ ॐ ॥ ॐ ॥ ॐ ॥

************************

अथ श्रीदत्तात्रेयस्तोत्राणि ।

## श्रीगुरुराजस्तवः ।

श्रीसद्गुरवे नमः ॥

सद्गुरुं भज सद्गुरुं भज सद्गुरुं भज वुद्धिमन्
येन संसृतिपारमेष्यसि मुक्त इत्यपि गास्यसे ॥

आसुरीं त्यज संपदं विपदां पदं मुनिगर्हितां तर्हि तां
भज संपदं मुनिसंस्तुतां भगवत्प्रियाम् ॥१॥

गर्वपर्वतमस्तके तव संस्थितिर्नहि शोभते
पातमेण्यसि घातकर्मणि युज्यसे नतु पूज्यसे ॥

सात्त्विकं फलमश्नुषे यदि सत्यवृत्तपरायणो
दनुजसूनुरिवामरद्रुममर्हणं भगवत्पदम् ॥२॥

दंभमार्गपरायणं यदि सत्फलाय भवत्यहो
इल्वलादिकृताऽपि विप्रवरार्चना विषमा कथम् ॥

कष्टमेष्यसि दुष्टबुद्धिपरायणो यदि चांतरे मृष्ट मृष्ट

परं पदं तव दूरतः स्तवकर्मणाम् ॥३॥

भुक्तताऽपि मुमुक्षुता कपटौघमूलनिकृंतनी
नीतिरर्भकता तथा यदि नास्ति जन्म निरर्थकम् ॥

केषु ते गणना भवेद्वद विद्यवेद्यसमांतरे भासुरं
जनजन्म कर्म निरर्थकं कुरुषे कुतः ॥४॥

साधुचित्तविखंडनाद्भगवत्प्रियावपि दानवौ तत्र
साधुविघर्षणादपि राक्षसौ मुनिभक्तकौ ॥

तेन हीनबलावथो नृपनामदूषकराक्षसौ
कृष्णहिंसनतत्परावििति कर्मणो गहना गतिः ॥५॥

ब्रह्मनिष्ठविमाननान्निजसूनुगीतहरेः पदे द्वेष
आविरभूद्भवग्रहमांत्रिके निजसेविते ॥

दानवस्य च दानधर्मपरायणस्य च रक्षसः
शैवधर्मरतस्य मूलविनाशनोऽप्यघनाशने ॥६॥

जीवतामपहापयञ्छिवतां दिशत्यतिकौशलात्
पूर्ववत्स्थितविश्वमेष तिरःकरोत्यति लीलया ॥

तं गुरुं भज नम्रमोचनकारकं भवतारकं तत्र
शात्रवमत्र यच्छति वृक्षतां पितृकानने ॥७॥

श्रीगुरौः पदपंकजं भजतां सतां सततं हरिः
संनिधाविति सर्वशासनसारमेतदुदीरितम् ॥

तन्महत्त्वमहांबुधेरपरं तटं न हि केचन प्राप्नुवन्ति
परावरज्ञाः पंडिताः सनकादयः ॥८॥

शब्दमूलमहो गुरुः शिवजीवविश्वभिदास्पदं
विश्वजीवशिवादिनामत एष एव हि बुध्यते ॥

वाच्यकोटिनिविष्टमेव हि तत्त्रयं कृतपत्त्रयं
लक्ष्यभूतवपुर्गुरुस्तमु जानते न हि कश्चन ॥९॥

वृत्त्यनाश्रितचित्स्वरूपकं एष एव समः प्रभो
वृत्तिरूढचिदंबरं खलु जीव ईश इदं जगत् ॥

जन्ममृत्युनियामकः परमेश्वरः स तु
भोगभुग्जन्ममृत्युनिवारकः परमेश्वरादतिरिच्यते
॥१०॥

ब्रह्मरन्ध्रपदं गुरोर्हृदयं शिवस्य निजास्पदं स्थानमेव
हि तत्स्वरूपविनिर्णयाय भवत्फलम् ॥

हृद्यतो विषयान्भजत्यथ नैव किंचन रंध्रगो
यच्छति क्रमतः फलं वद मुक्तिदोऽस्त्यनयोस्तु कः

॥११॥

तत्स्वरूपविमर्शनं गुरुपादुकामनुसंशितं तन्मनुस्तु
तदीयपूर्णकृपाभरेण हि लभ्यते ॥

लाभतो गुरुणा सहैक्यविमर्शनं परमं पदं तत्र
मुक्तिवरांगना वृणुते स्वयं निजसंपदा ॥१२॥

तत्र यो विमुखो नरो निजघातकीति निगद्यते तस्य
संमुखतां भजन् परमद्वयं भवति क्षणात् ॥

ऋक्श्रुतिः शतधारमित्यपि नौति तां गुरुपादुका
कृष्णभिक्षुरिमं स्तवं पदपंकजेऽर्पयते गुरोः ॥१३॥

द्रोणपर्वतवासिने नतशासिने मतिकाशिने हारिणे
विपदां मुहुर्मम दायिनेऽखिलसंपदाम् ॥

सच्चिदादिसुकाभिधाय यतीश्वराय सहस्त्रशः संतु
मे नतयो दयोदकसागराय दिने दिने ॥१४॥

स्तोत्रमेतदभीष्टसिद्धिदमासुरव्रतहारकं तारकं
निजदेशिकेंद्रपदाब्जयोर्दृढसन्मतेः ॥

यः पठेत्प्रयतः शुचिः सुविचार्य भूरि दिने दिने
मुच्यते भवपाशपाशित एवमेव मतिर्मम ॥१५॥

इति श्रीमत्कृष्णानन्दसरस्वतीकृतगुरुराजस्तवः सम्पूर्णः

************************

दत्तरक्षास्तोत्रम्.

ह्या दत्तरक्षास्तोत्राचा । ऋषि अव्यक्त बोलिला ।

अनुष्ठुप छंद हा त्याचा । देवता दत्त योगिराट् ॥१॥

बीज द्रां शक्ति ह्रीं क्लीं हें । कीलक वज्रसें महान् ।

धर्मार्थकाममोक्षार्थी । विनियोग असे तथा ॥२॥

अथ ध्यानम्

माल कमंडलु लसे कर खालच्यांत ।

डमरुत्रिशूळ मधल्या करपद्मयुग्मीं ।

ऊंच द्विहस्तकमलीं शुभशंखचक्र ।

ऐशा नमूं विधि हरीश स्वरुप दत्ता ॥३॥

इति ध्यानम्

धरुनि ध्यान ऐसें हें । भावें सात्त्विक वंदुनी ।
मानसपूजनीं प्रेमें । तोषवूं गुरुमूर्तिला ॥४॥
पृथ्वी तत्त्वें करुं टीळा । लंब्रीजें हरुषें तथा ।
हं-बीजें व्योमतत्त्वें त्या । अर्पूं पुष्पें यथा मति ॥५॥
यं-बीजें धूपवातात्मा । अग्न्यात्मा दीप रं तथा ।
नैवेद्यार्थी अमृतात्मा । कं-बीजें अर्पिला पुनः ॥६॥
सं-बीजें कल्पिलें शेष । नत्यादि सूपचार जें ।
सर्वार्पण बली तैसा । दास्यें देह दमूं मुदा ॥७॥
रक्षो दत्तात्रेय डोकें । भाल अत्रिसुतर्षभ ।
नासिका योगिराड् रक्षो । रक्षो नेत्र अनंतदृक् ॥८॥
रक्षो तोंड सर्वभक्षी । रक्षो ओठ जनार्दन ।

रक्षो जिह्वा शारदात्मा । रक्षो दंत दयानिधि ॥९॥
वनस्पतीश केसांना । वाताश्वारुढ कर्ण हे ।
रक्षो हनुवटी शूली । रक्षो कंठ कलानिधि ॥१०॥
स्कंध खं ब्रह्मरुपीं जे । रक्षो कांडीं कृपांबुधी ।
हात हारी अंगुलींना । रक्षो आरण्य वासी जो ॥११॥
रक्षो छाती सोमभ्राता । काळीज कर्मसाक्षी तो ।
हरि हृदय रक्षो हा । हृदयस्थ करो सदा ॥१२॥
विश्वंभर विश्वरुपी । रक्षो पोट सनातन ।
रक्षो कटि कामरुपी । जंघा आजानुबाहु जो ॥१३॥
जानु अत्रितनूत्पन्न । घोटे हे धनकांतिधृक् ।
नखें नानारुपधारी । वामनात्मा तथा पद ॥१४॥
यमरुपी गुदा रक्षो । रक्षो लिंग प्रजापति ।
कमेंद्रियें कर्मशून्य । ज्ञानी ज्ञानेंद्रियें तथा ॥१५॥

रक्षो मज्जा महामायी । मेद त्रैलोक्य मोहन ।
मांस मेधानिधी रक्षो । रक्तलोहित लोचन ॥१६॥
अस्थी आनंदमूर्ती हा । त्वचा तारुण्यमूर्तिमान् ।
रक्षो वीर्य चिरंजीवी । लाळ लावण्यसागर ॥१७॥
षड्भुजा चक्रषड् रक्षो । सहस्त्रारनिवासी जो ।
आपदशीर्ष अद्वैत । नाऽयादि नररुपधृक् ॥१८॥
दुर्विकारांतून कामादि । रक्षो नृसिंह नाटकी ।
वासुदेव आधिव्याधि । उपाधींतून संयमी ॥१९॥
भूतप्रेतादिपासून । रक्षो श्रीपादवल्लभ ।
कालकाल दुर्ग्रहीतो । जन्ममृत्यूहूनी हर ॥२०॥
पूर्वेकडे वायुभक्षी । पश्चिमीं पावकोपम ।
उत्तरीं व्योमकेशी हा । रक्षा दैत्यारि दक्षिणीं
॥२१॥
चार कोणीं कामचारी । ऊंचीं अव्यक्त अतिथि ।
खालीं सश्चित्सुखात्मा जो । शेषछत्र स्थळीं स्थळीं

॥२२॥

मृत्यूचा मृत्यु मध्यें जो । मृत्युंजय चहूंकडे ।
जनीं जात्यनवच्छिन्न । सहवासीं वनीं तधा ॥२३॥
जलशायीं जळीं रक्षो । स्थाणुरुप स्थळीं स्थळी ।
अग्नीमध्यें अनंतात्मा । शस्त्रास्त्राहून तो बळी
॥२४॥

रक्षो दुष्टाहून दाता । खेचरीं तो खलांतक ।
व्यालादीं जो जगन्नाथ । भूचरीं हा भयानक
॥२५॥

जळीं जळचराहूनी । रक्षो पन्नगभूषण ।
सर्वस्थळीं जटाधारी । संकटी विषमस्थळीं ॥२६॥
जागतां स्मर्तृगामी तो । सूत्रात्मा स्वप्नदर्शनीं ।
मूर्छाकाळीं अमेयात्मा । निद्रेंत अनधाप्रिय ॥२७॥
रक्षो रोगी रोगशून्य । भोगी भोगद सर्वदा ।
स्वास्थ्यीं शर्मद शांतात्मा । सदा ब्रह्म दिगंबर
॥२८॥

दुर्भक्षीं अन्न्पूर्णेंश । सुभिक्षीं सकलार्तिहा ।
सूतकीं शरणत्राता । मंगलीं मोददायका ॥२९॥
रक्षो सदा सिद्धराज । सर्वत्र सर्वदा सुधी ।
क्षमापून दोष सर्व । यथा माता स्तनंधय ॥३०॥
दत्तरक्षा स्तोत्र हें जो । पठे भोगापर्वद ।
त्रिकाळीं एककाळीं वा । भय त्याला नडे कुठें ॥३१॥
औदुंबरतळीं कोणी । प्रातःकाळीं पढे नर ।
गृहांगणीं सांजकाळीं । अथवा शयनस्थळीं ॥३२॥
दुपारीं देवमंदिरीं । शुचिर्भूतपणें सदा ।
रक्षो भावें पढें त्याला । अत्रिवरप्रद तथा ॥३३॥
श्रीदत्त दत्त कुलतारक दत्त ।
श्रीदत्त दत्त रिपुमारक दत्त ।
श्रीदत्त दत्त भयहाकर दत्त दत्त ।

श्रीदत्त दत्त मुददायक दत्त दत्त ॥३४॥

स्मरतां रे दत्त दत्त । निर्जनीं देह हा पडो ।

पावो तृप्ति पशूपक्षी । मिष्टदेहान्नसेवनें ॥३५॥

ज्या ज्या स्थळीं हे मन जाय माझें ।

त्या त्या स्थळीं सदगुरु रुप तूझें ।

मी ठेवितो मस्तक ज्या ठिकाणीं ।

तेथें तुझें सद्‌गुरु पाय दोन्हीं ॥३६॥

************************

अशोककाका कुलकर्णी

पाचेगावकर

९०९६३४२४५१